# Rigveda Mandala 5

# ઋગ્વેદઃ મણ્ડલં ૫

## Document Information

Text title : Rigveda Mandalam 5

File name : r05.itx

Category : veda, rigveda, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : 1. Source: Aufrecht/van Nooten/Holland (Samhita), 2. Final transliteration: Detlef Eichler

Proofread by : Detlef Eichler detlefeichler at googlemail.com

Latest update : July 2, 2013

Send corrections to : detlefeichler@googlemail.com, sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2020

*sanskritdocuments.org*

# Rigveda Mandala 5

# ઋગ્વેદઃ મણ્ડલં ૫

અબોધ્યગ્નિઃ સમિધા જનાનાં પ્રતિ ધેનુમિવાયતીમુષાસમ્ ।
યહ્વા ઇવ પ્ર વયામુજ્જિહાનાઃ પ્ર ભાનવઃ સિસ્રતે નાકમચ્છ ॥ ૫.૦૦૧.૦૧
અબોધિ હોતા યજથાય દેવાનૂર્ધ્વો અગ્નિઃ સુમનાઃ પ્રાતરસ્થાત્ ।
સમિદ્ધસ્ય રુશદદર્શિ પાજો મહાન્દેવસ્તમસો નિરમોચિ ॥ ૫.૦૦૧.૦૨
યદીં ગણસ્ય રશનામજીગઃ શુચિરઙ્ક્તે શુચિભિર્ગોભિરગ્નિઃ ।
આદ્દક્ષિણા યુજ્યતે વાજયન્ત્યુત્તાનામૂર્ધ્વો અધયજ્જુહૂભિઃ ॥ ૫.૦૦૧.૦૩
અગ્નિમચ્છા દેવયતાં મનાંસિ ચક્ષૂંષીવ સૂર્યે સં ચરન્તિ ।
યદીં સુવાતે ઉષસા વિરૂપે શ્વેતો વાજી જાયતે અગ્રે અહ્નામ્ ॥ ૫.૦૦૧.૦૪
જનિષ્ટ હિ જેન્યો અગ્રે અહ્નાં હિતો હિતેષ્વરુષો વનેષુ ।
દમેદમે સપ્ત રત્ના દધાનોઽગ્નિર્હોતા નિ ષસાદા યજીયાન્ ॥ ૫.૦૦૧.૦૫
અગ્નિર્હોતા ન્યસીદદ્યજીયાનુપસ્થે માતુઃ સુરભા ઉ લોકે ।
યુવા કવિઃ પુરુનિષ્ઠ ઋતાવા ધર્તા કૃષ્ટીનામુત મધ્ય ઇદ્ધઃ ॥ ૫.૦૦૧.૦૬
પ્ર ણુ ત્યં વિપ્રમધ્વરેષુ સાધુમગ્નિં હોતારમીળતે નમોભિઃ ।
આ યસ્તતાન રોદસી ઋતેન નિત્યં મૃજન્તિ વાજિનં ઘૃતેન ॥ ૫.૦૦૧.૦૭
માર્જાલ્યો મૃજ્યતે સ્વે દમૂનાઃ કવિપ્રશસ્તો અતિથિઃ શિવો નઃ ।
સહસ્રશ◌ૃઙ્ગો વૃષભસ્તદોજા વિશ્વા◌ઁ અગ્ને સહસા પ્રાસ્યન્યાન્ ॥ ૫.૦૦૧.૦૮
પ્ર સદ્યો અગ્ને અત્યેષ્યન્યાનાવિર્યસ્મૈ ચારુતમો બભૂથ ।
ઈળેન્યો વપુષ્યો વિભાવા પ્રિયો વિશામતિથિર્માનુષીણામ્ ॥ ૫.૦૦૧.૦૯
તુભ્યં ભરન્તિ ક્ષિતયો યવિષ્ઠ બલિમગ્ને અન્તિત ઓત દૂરાત્ ।
આ ભન્દિષ્ઠસ્ય સુમતિં ચિકિદ્ધિ બૃહત્તે અગ્ને મહિ શર્મ ભદ્રમ્ ॥ ૫.૦૦૧.૧૦
આદ્ય રથં ભાનુમો ભાનુમન્તમગ્ને તિષ્ઠ યજતેભિઃ સમન્તમ્ ।
વિદ્વાન્પથીનામુર્વ૧ન્તરિક્ષમેહ દેવાન્હવિરદ્યાય વક્ષિ ॥ ૫.૦૦૧.૧૧

અવોચામ કવયે  મેધ્યાય  વચો  વન્દારુ  વૃષભાય  વૃષ્ણે  ।
ગવિષ્ઠિરો  નમસા  સ્તોમમગ્નૌ દિવીવ રુક્મમુરુવ્યઞ્ચમશ્રેત્ ॥ ૫.૦૦૧.૧૨

કુમારં માતા યુવતિઃ સમુબ્ધં  ગુહા  બિભર્તિ  ન દદાતિ પિત્રે ।
અનીકમસ્ય  ન મિનજ્જનાસઃ પુરઃ પશ્યન્તિ  નિહિતમરતૌ ॥ ૫.૦૦૨.૦૧
કમેતં ત્વં યુવતે કુમારં પેષી  બિભર્ષિ  મહિષી જજાન ।
પૂર્વીર્હિ ગર્ભઃ  શરદો  વવર્ધાપશ્યં જાતં યદસૂત માતા ॥ ૫.૦૦૨.૦૨
હિરણ્યદન્તં  શુચિવર્ણમારાત્ક્ષેત્રાદપશ્યમાયુધા  મિમાનમ્ ।
દદાનો અસ્મા અમૃતં  વિપૃક્વત્કિં મામનિન્દ્રાઃ કૃણવન્નનુક્થાઃ ॥ ૫.૦૦૨.૦૩
ક્ષેત્રાદપશ્યં સનુતશ્ચરન્તં સુમદ્યૂથં ન પુરુ શોભમાનમ્ ।
ન તા અગૃભ્રન્નજનિષ્ટ  હિ ષઃ પલિક્નીરિદ્યુવતયો  ભવન્તિ ॥ ૫.૦૦૨.૦૪
કે મે  મર્યકં વિ યવન્ત  ગોભિર્ન યેષાં  ગોપા અરણશ્ચિદાસ  ।
ય ઈં  જગૃભુરવ  તે સૃજન્ત્વાજાતિ પશ્વ ઉપ  નશ્ચિકિત્વાન્ ॥ ૫.૦૦૨.૦૫
વસાં રાજાનં વસતિં જનાનામરાતયો  નિ દધુર્મર્ત્યેષુ ।
બ્રહ્માણ્યત્રેરવ  તં સૃજન્તુ નિન્દિતારો  નિન્દ્યાસો ભવન્તુ ॥ ૫.૦૦૨.૦૬
શુનશ્ચિચ્છેપં  નિદિતં સહસ્રાદ્યૂપાદમુઞ્ચો  અશમિષ્ટ  હિ ષઃ ।
એવાસ્મદગ્ને  વિ મુમુગ્ધિ  પાશાન્હોતશ્ચિકિત્વ ઇહ તૂ નિષદ્ય  ॥ ૫.૦૦૨.૦૭
હૃણીયમાનો  અપ  હિ મદૈયેઃ  પ્ર મે  દેવાનાં  વ્રતપા ઉવાચ ।
ઇન્દ્રો  વિદ્વાઁ અનુ  હિ ત્વા  ચચક્ષ  તેનાહમગ્ને  અનુશિષ્ટ  આગામ્ ॥ ૫.૦૦૨.૦૮
વિ જ્યોતિષા બૃહતા ભાત્યગ્નિરાવિર્વિશ્વાનિ કૃણુતે મહિત્વા ।
પ્રાદેવીર્માયાઃ સહતે દુરેવાઃ  શિશીતે  શ◌ૃઙ્ગે  રક્ષસે વિનિક્ષે  ॥ ૫.૦૦૨.૦૯
ઉત સ્વાનાસો  દિવિ ષન્ત્વગ્નેસ્તિગ્માયુધા  રક્ષસે  હન્તવા ઉ  ।
મદે  ચિદસ્ય  પ્ર રુજન્તિ  ભામા  ન વરન્તે પરિબાધો  અદેવીઃ ॥ ૫.૦૦૨.૧૦
એતં તે  સ્તોમં  તુવિજાત  વિપ્રો  રથં  ન ધીરઃ  સ્વપા  અતક્ષમ્ ।
યદીદગ્ને  પ્રતિ  ત્વં દેવ  હર્યાઃ  સ્વર્વતીરપ એના જયેમ ॥ ૫.૦૦૨.૧૧
તુવિગ્રીવો  વૃષભો વાવૃધાનોऽશત્ર્વ૧ર્યઃ સમજાતિ  વેદઃ  ।
ઇતીમમગ્નિમમૃતા  અવોચન્બર્હિષ્મતે  મનવે  શર્મ  યંસદ્ધવિષ્મતે  મનવે  શર્મ  યંસત્ ॥ ૫.૦૦૨.૧૨

ત્વમગ્ને  વરુણો  જાયસે  યત્ત્વં મિત્રો ભવસિ  યત્સમિદ્ધઃ ।

ત્વે વિશ્વે સહસસ્પુત્ર દેવાસ્ત્વમિન્દ્રો દાશુષે મર્ત્યાય ॥ ૫.૦૦૩.૦૧

ત્વમર્યમા ભવસિ યત્કનીનાં નામ સ્વધાવન્ગુહ્યં બિભર્ષિ ।

અઞ્જન્તિ મિત્રં સુધિતં ન ગોભિર્યદ્દમ્પતી સમનસા કૃણોષિ ॥ ૫.૦૦૩.૦૨

તવ શ્રિયે મરુતો મર્જયન્ત રુદ્ર યત્તે જનિમ ચારુ ચિત્રમ્ ।

પદં યદ્વિષ્ણોરુપમં નિધાયિ તેન પાસિ ગુહ્યં નામ ગોનામ્ ॥ ૫.૦૦૩.૦૩

તવ શ્રિયા સુદૃશો દેવ દેવાઃ પુરૂ દધાના અમૃતં સપન્ત ।

હોતારમગ્નિં મનુષો નિ ષેદુર્દશસ્યન્ત ઉશિજઃ શંસમાયોઃ ॥ ૫.૦૦૩.૦૪

ન ત્વદ્ધોતા પૂર્વો અગ્ને યજીયાન્ન કાવ્યૈઃ પરો અસ્તિ સ્વધાવઃ ।

વિશશ્ચ યસ્યા અતિથિર્ભવાસિ સ યજ્ઞેન વનવદ્દેવ મર્તાન્ ॥ ૫.૦૦૩.૦૫

વયમગ્ને વનુયામ ત્વોતા વસૂયવો હવિષા બુધ્યમાનાઃ ।

વયં સમર્યે વિદથેષ્વહ્નાં વયં રાયા સહસસ્પુત્ર મર્તાન્ ॥ ૫.૦૦૩.૦૬

યો ન આગો અભ્યેનો ભરાત્યધીદઘમઘશંસે દધાત ।

જહી ચિકિત્વો અભિશસ્તિમેતામગ્ને યો નો મર્ચયતિ દ્વયેન ॥ ૫.૦૦૩.૦૭

ત્વામસ્યા વ્યુષિ દેવ પૂર્વે દૂતં કૃણ્વાના અયજન્ત હવ્યૈઃ ।

સંસ્થે યદગ્ન ઈયસે રયીણાં દેવો મર્તૈર્વસુભિરિધ્યમાનઃ ॥ ૫.૦૦૩.૦૮

અવ સ્પૃધિ પિતરં યોધિ વિદ્વાન્પુત્રો યસ્તે સહસઃ સૂન ઊહે ।

કદા ચિકિત્વો અભિ ચક્ષસે નોઽગ્ને કદાઁ ઋતચિદ્યાતયાસે ॥ ૫.૦૦૩.૦૯

ભૂરિ નામ વન્દમાનો દધાતિ પિતા વસો યદિ તજ્જોષયાસે ।

કુવિદ્દેવસ્ય સહસા ચકાનઃ સુમ્નમગ્નિર્વનતે વાવૃધાનઃ ॥ ૫.૦૦૩.૧૦

ત્વમઙ્ગ જરિતારં યવિષ્ઠ વિશ્વાન્યગ્ને દુરિતાતિ પર્ષિ ।

સ્તેના અદૃશ્રન્રિપવો જનાસોઽજ્ઞાતકેતા વૃજિના અભૂવન્ ॥ ૫.૦૦૩.૧૧

ઇમે યામાસસ્ત્વદ્રિગભૂવન્વસવે વા તદિદાગો અવાચિ ।

નાહાયમગ્નિરભિશસ્તયે નો ન રીષતે વાવૃધાનઃ પરા દાત્ ॥ ૫.૦૦૩.૧૨

ત્વામગ્ને વસુપતિં વસૂનામભિ પ્ર મન્દે અધ્વરેષુ રાજન્ ।

ત્વયા વાજં વાજયન્તો જયેમાભિ ષ્યામ પૃત્સુતીર્મર્ત્યાનામ્ ॥ ૫.૦૦૪.૦૧

હવ્યવાળગ્નિરજરઃ પિતા નો વિભુર્વિભાવા સુદૃશીકો અસ્મે ।

સુગાર્હપત્યાઃ સમિષો દિદીહ્યસ્મદ્ર્યક્સં મિમીહિ શ્રવાંસિ ॥ ૫.૦૦૪.૦૨

વિશાં કવિં વિશ્પતિં માનુષીણાં શુચિં પાવકં ઘૃતપૃષ્ઠમગ્નિમ્ ।
નિ હોતારં વિશ્વવિદં દધિધ્વે સ દેવેષુ વનતે વાર્યાણિ ॥ ૫.૦૦૪.૦૩
જુષસ્વાગ્ન ઇળયા સજોષા યતમાનો રશ્મિભિઃ સૂર્યસ્ય ।
જુષસ્વ નઃ સમિધં જાતવેદ આ ચ દેવાન્હવિરદ્યાય વક્ષિ ॥ ૫.૦૦૪.૦૪
જુષ્ટો દમૂના અતિથિર્દુરોણ ઇમં નો યજ્ઞમુપ યાહિ વિદ્વાન્ ।
વિશ્વા અગ્ને અભિયુજો વિહત્યા શત્રૂયતામા ભરા ભોજનાનિ ॥ ૫.૦૦૪.૦૫
વધેન દસ્યું પ્ર હિ ચાતયસ્વ વયઃ કૃણ્વાનસ્તન્વેઉ સ્વાયૈ ।
પિપર્ષિ યત્સહસસ્પુત્ર દેવાન્ત્સો અગ્ને પાહિ નૃતમ વાજે અસ્માન્ ॥ ૫.૦૦૪.૦૬
વયં તે અગ્ન ઉક્થૈર્વિધેમ વયં હવ્યૈઃ પાવક ભદ્રશોચે ।
અસ્મે રયિં વિશ્વવારં સમિન્વાસ્મે વિશ્વાનિ દ્રવિણાનિ ધેહિ ॥ ૫.૦૦૪.૦૭
અસ્માકમગ્ને અધ્વરં જુષસ્વ સહસઃ સૂનો ત્રિષધસ્થ હવ્યમ્ ।
વયં દેવેષુ સુકૃતઃ સ્યામ શર્મણા નસ્ત્રિવરૂથેન પાહિ ॥ ૫.૦૦૪.૦૮
વિશ્વાનિ નો દુર્ગહા જાતવેદઃ સિન્ધું ન નાવા દુરિતાતિ પર્ષિ ।
અગ્ને અત્રિવન્નમસા ગૃણાનોઉઽસ્માકં બોધ્યવિતા તનૂનામ્ ॥ ૫.૦૦૪.૦૯
યસ્ત્વા હૃદા કીરિણા મન્યમાનોઽમર્ત્યં મર્ત્યો જોહવીમિ ।
જાતવેદો યશો અસ્માસુ ધેહિ પ્રજાભિરગ્ને અમૃતત્વમશ્યામ્ ॥ ૫.૦૦૪.૧૦
યસ્મૈ ત્વં સુકૃતે જાતવેદ ઉ લોકમગ્ને કૃણવઃ સ્યોનમ્ ।
અશ્વિનં સ પુત્રિણં વીરવન્તં ગોમન્તં રયિં નશતે સ્વસ્તિ ॥ ૫.૦૦૪.૧૧
સુસમિદ્ધાય શોચિષે ઘૃતં તીવ્રં જુહોતન ।
અગ્નયે જાતવેદસે ॥ ૫.૦૦૫.૦૧
નરાશંસઃ સુષૂદતીમં યજ્ઞમદાભ્યઃ ।
કવિર્હિ મધુહસ્ત્યઃ ॥ ૫.૦૦૫.૦૨
ઈળિતો અગ્ન આ વહેન્દ્રં ચિત્રમિહ પ્રિયમ્ ।
સુખૈ રથેભિરૂતયે ॥ ૫.૦૦૫.૦૩
ઊર્ણમ્રદા વિ પ્રથસ્વાભ્ય૧ર્કા અનૂષત ।
ભવા નઃ શુભ્ર સાતયે ॥ ૫.૦૦૫.૦૪
દેવીર્દ્વારો વિ શ્રયધ્વં સુપ્રાયણા ન ઊતયે ।

પ્રપ્ર યજ્ઞં પૃણીતન ॥ ૫.૦૦૫.૦૫

સુપ્રતીકે વયોવૃધા યહ્વી ઋતસ્ય માતરા ।

દોષામુષાસમીમહે ॥ ૫.૦૦૫.૦૬

વાતસ્ય પત્મન્નીળિતા દૈવ્યા હોતારા મનુષઃ ।

ઇમં નો યજ્ઞમા ગતમ્ ॥ ૫.૦૦૫.૦૭

ઇળા સરસ્વતી મહી તિસ્રો દેવીર્મયોભુવઃ ।

બર્હિઃ સીદન્ત્વસ્રિધઃ ॥ ૫.૦૦૫.૦૮

શિવસ્ત્વષ્ટરિહા ગહિ વિભુઃ પોષ ઉત ત્મના ।

યજ્ઞેયજ્ઞે ન ઉદવ ॥ ૫.૦૦૫.૦૯

યત્ર વેત્થ વનસ્પતે દેવાનાં ગુહ્યા નામાનિ ।

તત્ર હવ્યાનિ ગામય ॥ ૫.૦૦૫.૧૦

સ્વાહાગ્નયે વરુણાય સ્વાહેન્દ્રાય મરુદ્ભ્યઃ ।

સ્વાહા દેવેભ્યો હવિઃ ॥ ૫.૦૦૫.૧૧

અગ્નિં તં મન્યે યો વસુરસ્તં યં યન્તિ ધેનવઃ ।

અસ્તમર્વન્ત આશવોઽસ્તં નિત્યાસો વાજિન ઇષં સ્તોતૃભ્ય આ ભર ॥ ૫.૦૦૬.૦૧

સો અગ્નિર્યો વસુર્ગૃણે સં યમાયન્તિ ધેનવઃ ।

સમર્વન્તો રઘુદ્રુવઃ સં સુજાતાસઃ સૂરય ઇષં સ્તોતૃભ્ય આ ભર ॥ ૫.૦૦૬.૦૨

અગ્નિર્હિ વાજિનં વિશે દદાતિ વિશ્વચર્ષણિઃ ।

અગ્ની રાયે સ્વાભુવં સ પ્રીતો યાતિ વાર્યમિષં સ્તોતૃભ્ય આ ભર ॥ ૫.૦૦૬.૦૩

આ તે અગ્ન ઇધીમહિ દ્યુમન્તં દેવાજરમ્ ।

યદ્ધ સ્યા તે પનીયસી સમિદ્દીદયતિ દ્યવીષં સ્તોતૃભ્ય આ ભર ॥ ૫.૦૦૬.૦૪

આ તે અગ્ન ઋચા હવિઃ શુક્રસ્ય શોચિષસ્પતે ।

સુશ્ચન્દ્ર દસ્મ વિશ્પતે હવ્યવાટ્ તુભ્યં હૂયત ઇષં સ્તોતૃભ્ય આ ભર ॥ ૫.૦૦૬.૦૫

પ્રો ત્યે અગ્નયોઽગ્નિષુ વિશ્વં પુષ્યન્તિ વાર્યમ્ ।

તે હિન્વિરે ત ઇન્વિરે ત ઇષણ્યન્ત્યાનુષગિષં સ્તોતૃભ્ય આ ભર ॥ ૫.૦૦૬.૦૬

તવ ત્યે અગ્ને અર્ચયો મહિ વ્રાધન્ત વાજિનઃ ।

યે પત્વભિઃ શફાનાં વ્રજા ભુરન્ત ગોનામિષં સ્તોતૃભ્ય આ ભર ॥ ૫.૦૦૬.૦૭

નવા નો અગ્ન આ ભર સ્તોતૃભ્યઃ સુક્ષિતીરિષઃ ।
તે સ્યામ ય આનૃચુસ્ત્વાદૂતાસો દમેદમ ઇષં સ્તોતૃભ્ય આ ભર ॥ ૫.૦૦૬.૦૮
ઉભે સુશ્ચન્દ્ર સર્પિષો દર્વી શ્રીણીષ આસનિ ।
ઉતો ન ઉત્પુપૂર્યા ઉક્થેષુ શવસસ્પત ઇષં સ્તોતૃભ્ય આ ભર ॥ ૫.૦૦૬.૦૯
એવાઁ અગ્નિમજુર્યમુર્ગીર્ભિર્યજ્ઞેભિરાનુષક્ ।
દધદસ્મે સુવીર્યમુત ત્યદાશ્વશ્વ્યમિષં સ્તોતૃભ્ય આ ભર ॥ ૫.૦૦૬.૧૦
સખાયઃ સં વઃ સમ્યઞ્ચમિષં સ્તોમં ચાગ્નયે ।
વર્ષિષ્ઠાય ક્ષિતીનામૂર્જો નપ્ત્રે સહસ્વતે ॥ ૫.૦૦૭.૦૧
કુત્રા ચિદ્યસ્ય સમૃતૌ રણ્વા નરો નૃષદને ।
અર્હન્તશ્ચિદ્યમિન્ધતે સંજનયન્તિ જન્તવઃ ॥ ૫.૦૦૭.૦૨
સં યદિષો વનામહે સં હવ્યા માનુષાણામ્ ।
ઉત દ્યુમ્નસ્ય શવસ ઋતસ્ય રશ્મિમા દદે ॥ ૫.૦૦૭.૦૩
સ સ્મા કૃણોતિ કેતુમા નક્તં ચિદ્દૂર આ સતે ।
પાવકો યદ્વનસ્પતીન્પ્ર સ્મા મિનાત્યજરઃ ॥ ૫.૦૦૭.૦૪
અવ સ્મ યસ્ય વેષણે સ્વેદં પથિષુ જુહ્વતિ ।
અભીમહ સ્વજેન્યં ભૂમા પૃષ્ઠેવ રુરુહુઃ ॥ ૫.૦૦૭.૦૫
યં મર્ત્યઃ પુરુસ્પૃહં વિદદ્વિશ્વસ્ય ધાયસે ।
પ્ર સ્વાદનં પિતૂનામસ્તતાતિં ચિદાયવે ॥ ૫.૦૦૭.૦૬
સ હિ ષ્મા ધન્વાક્ષિતં દાતા ન દાત્યા પશુઃ ।
હિરિશ્મશ્રુઃ શુચિદન્નૃભુરનિભૃષ્ટતવિષિઃ ॥ ૫.૦૦૭.૦૭
શુચિઃ ષ્મ યસ્મા અત્રિવત્પ્ર સ્વધિતીવ રીયતે ।
સુષૂરસૂત માતા ક્રાણા યદાનશે ભગમ્ ॥ ૫.૦૦૭.૦૮
આ યસ્તે સર્પિરાસુતેઽગ્ને શમસ્તિ ધાયસે ।
ઐષુ દ્યુમ્નમુત શ્રવ આ ચિત્તં મર્ત્યેષુ ધાઃ ॥ ૫.૦૦૭.૦૯
ઇતિ ચિન્મન્યુમધ્રિજસ્ત્વાદાતમા પશું દદે ।
આદગ્ને અપૃણતોઽત્રિઃ સાસહ્યાદ્દસ્યૂનિષઃ સાસહ્યાન્નૄન્ ॥ ૫.૦૦૭.૧૦
ત્વામગ્ન ઋતાયવઃ સમીધિરે પ્રત્નં પ્રત્નાસ ઊતયે સહસ્કૃત ।

પુરુશ્ચન્દ્રં યજતં વિશ્વધાયસં દમૂનસં ગૃહપતિં વરેણ્યમ્ ॥ ૫.૦૦૮.૦૧
ત્વામગ્ને અતિથિં પૂર્વ્યં વિશઃ શોચિષ્કેશં ગૃહપતિં નિ ષેદિરે ।
બૃહત્કેતું પુરુરૂપં ધનસ્પૃતં સુશર્માણં સ્વવસં જરદ્વિષમ્ ॥ ૫.૦૦૮.૦૨
ત્વામગ્ને માનુષીરીળતે વિશો હોત્રાવિદં વિવિચિં રત્નધાતમમ્ ।
ગુહા સન્તં સુભગ વિશ્વદર્શતં તુવિષ્વણસં સુયજં ઘૃતશ્રિયમ્ ॥ ૫.૦૦૮.૦૩
ત્વામગ્ને ધર્ણસિં વિશ્વધા વયં ગીર્ભિર્ગૃણન્તો નમસોપ સેદિમ ।
સ નો જુષસ્વ સમિધાનો અઙ્ગિરો દેવો મર્તસ્ય યશસા સુદીતિભિઃ ॥ ૫.૦૦૮.૦૪
ત્વમગ્ને પુરુરૂપો વિશેવિશે વયો દધાસિ પ્રત્નથા પુરુષ્ટુત ।
પુરૂણ્યન્ના સહસા વિ રાજસિ ત્વિષિઃ સા તે તિત્વિષાણસ્ય નાધૃષે ॥ ૫.૦૦૮.૦૫
ત્વામગ્ને સમિધાનં યવિષ્ઠ્ય દેવા દૂતં ચક્રિરે હવ્યવાહનમ્ ।
ઉરુજ્રયસં ઘૃતયોનિમાહુતં ત્વેષં ચક્ષુર્દધિરે ચોદયન્મતિ ॥ ૫.૦૦૮.૦૬
ત્વામગ્ને પ્રદિવ આહુતં ઘૃતૈઃ સુમ્નાયવઃ સુષમિધા સમીધિરે ।
સ વાવૃધાન ઓષધીભિરુક્ષિતોઽભિ જ્રયાંસિ પાર્થિવા વિ તિષ્ઠસે ॥ ૫.૦૦૮.૦૭

ત્વામગ્ને હવિષ્મન્તો દેવં મર્તાસ ઈળતે ।
મન્યે ત્વા જાતવેદસં સ હવ્યા વક્ષ્યાનુષક્ ॥ ૫.૦૦૯.૦૧
અગ્નિર્હોતા દાસ્વતઃ ક્ષયસ્ય વૃક્તબર્હિષઃ ।
સં યજ્ઞાસશ્ચરન્તિ યં સં વાજાસઃ શ્રવસ્યવઃ ॥ ૫.૦૦૯.૦૨
ઉત સ્મ યં શિશું યથા નવં જનિષ્ટારણી ।
ધર્તારં માનુષીણાં વિશામગ્નિં સ્વધ્વરમ્ ॥ ૫.૦૦૯.૦૩
ઉત સ્મ દુર્ગૃભીયસે પુત્રો ન હ્વાર્યાણામ્ ।
પુરૂ યો દગ્ધાસિ વનાગ્ને પશુર્ન યવસે ॥ ૫.૦૦૯.૦૪
અધ સ્મ યસ્યાર્ચયઃ સમ્યક્સંયન્તિ ધૂમિનઃ ।
યદીમહ ત્રિતો દિવ્યુપ ધ્માતેવ ધમતિ શિશીતે ધ્માતરી યથા ॥ ૫.૦૦૯.૦૫
તવાહમગ્ન ઊતિભિર્મિત્રસ્ય ચ પ્રશસ્તિભિઃ ।
દ્વેષોયુતો ન દુરિતા તુર્યામ મર્ત્યાનામ્ ॥ ૫.૦૦૯.૦૬
તં નો અગ્ને અભી નરો રયિં સહસ્વ આ ભર ।
સ ક્ષેપયત્સ પોષયદ્ભુવદ્વાજસ્ય સાતય ઉતૈધિ પૃત્સુ નો વૃધે ॥ ૫.૦૦૯.૦૭

અગ્ન ઓજિષ્ઠમા ભર દ્યુમ્નમસ્મભ્યમધ્રિગો ।
પ્ર નો રાયા પરીણસા રત્સિ વાજાય પન્થામ્ ॥ ૫.૦૧૦.૦૧
ત્વં નો અગ્ને અદ્ભુત ક્રત્વા દક્ષસ્ય મંહના ।
ત્વે અસુર્ય૧મારુહત્ક્રાણા મિત્રો ન યજ્ઞિયઃ ॥ ૫.૦૧૦.૦૨
ત્વં નો અગ્ન એષાં ગયં પુષ્ટિં ચ વર્ધય ।
યે સ્તોમેભિઃ પ્ર સૂરયો નરો મઘાન્યાનશુઃ ॥ ૫.૦૧૦.૦૩
યે અગ્ને ચન્દ્ર તે ગિરઃ શુમ્ભન્ત્યશ્વરાધસઃ ।
શુષ્મેભિઃ શુષ્મિણો નરો દિવશ્ચિદ્યેષાં બૃહત્સુકીર્તિર્બોધતિ ત્મના ॥ ૫.૦૧૦.૦૪
તવ ત્યે અગ્ને અર્ચયો ભ્રાજન્તો યન્તિ ધૃષ્ણુયા ।
પરિજ્માનો ન વિદ્યુતઃ સ્વાનો રથો ન વાજયુઃ ॥ ૫.૦૧૦.૦૫
નૂ નો અગ્ન ઊતયે સબાધસશ્ચ રાતયે ।
અસ્માકાસશ્ચ સૂરયો વિશ્વા આશાસ્તરીષણિ ॥ ૫.૦૧૦.૦૬
ત્વં નો અગ્ને અઙ્ગિરઃ સ્તુતઃ સ્તવાન આ ભર ।
હોતર્વિભ્વાસહં રયિં સ્તોતૃભ્યઃ સ્તવસે ચ ન ઉતૈધિ પૃત્સુ નો વૃધે ॥ ૫.૦૧૦.૦૭

જનસ્ય ગોપા અજનિષ્ટ જાગૃવિરગ્નિઃ સુદક્ષઃ સુવિતાય નવ્યસે ।
ઘૃતપ્રતીકો બૃહતા દિવિસ્પૃશા દ્યુમદ્વિ ભાતિ ભરતેભ્યઃ શુચિઃ ॥ ૫.૦૧૧.૦૧
યજ્ઞસ્ય કેતું પ્રથમં પુરોહિતમગ્નિં નરસ્ત્રિષધસ્થે સમીધિરે ।
ઇન્દ્રેણ દેવૈઃ સરથં સ બર્હિષિ સીદન્નિ હોતા યજથાય સુક્રતુઃ ॥ ૫.૦૧૧.૦૨
અસમ્મૃષ્ટો જાયસે માત્રોઃ શુચિર્મન્દ્રઃ કવિરુદતિષ્ઠો વિવસ્વતઃ ।
ઘૃતેન ત્વાવર્ધયન્નગ્ન આહુત ધૂમસ્તે કેતુરભવદ્દિવિ શ્રિતઃ ॥ ૫.૦૧૧.૦૩
અગ્નિર્નો યજ્ઞમુપ વેતુ સાધુયાગ્નિં નરો વિ ભરન્તે ગૃહેગૃહે ।
અગ્નિર્દૂતો અભવદ્ધવ્યવાહનોઽગ્નિં વૃણાના વૃણતે કવિક્રતુમ્ ॥ ૫.૦૧૧.૦૪
તુભ્યેદમગ્ને મધુમત્તમં વચસ્તુભ્યં મનીષા ઇયમસ્તુ શં હૃદે ।
ત્વાં ગિરઃ સિન્ધુમિવાવનીર્મહીરા પૃણન્તિ શવસા વર્ધયન્તિ ચ ॥ ૫.૦૧૧.૦૫
ત્વામગ્ને અઙ્ગિરસો ગુહા હિતમન્વવિન્દઞ્છિશ્રિયાણં વનેવને ।
સ જાયસે મથ્યમાનઃ સહો મહત્ત્વામાહુઃ સહસસ્પુત્રમઙ્ગિરઃ ॥ ૫.૦૧૧.૦૬

પ્રાગ્નયે બૃહતે યજ્ઞિયાય ઋતસ્ય વૃષ્ણે અસુરાય મન્મ ।

ઘૃતં ન યજ્ઞ આસ્યે૩ સુપૂતં ગિરં ભરે વૃષભાય પ્રતીચીમ્ ॥ ૫.૦૧૨.૦૧
ઋતં ચિકિત્વ ઋતમિચ્ચિકિદ્ધ્યૃતસ્ય ધારા અનુ તૃન્ધિ પૂર્વીઃ ।
નાહં યાતું સહસા ન દ્વયેન ઋતં સપામ્યરુષસ્ય વૃષ્ણઃ ॥ ૫.૦૧૨.૦૨
કયા નો અગ્ન ઋતયન્નૃતેન ભુવો નવેદા ઉચથસ્ય નવ્યઃ ।
વેદા મે દેવ ઋતુપા ઋતૂનાં નાહં પતિં સનિતુરસ્ય રાયઃ ॥ ૫.૦૧૨.૦૩
કે તે અગ્ને રિપવે બન્ધનાસઃ કે પાયવઃ સનિષન્ત દ્યુમન્તઃ ।
કે ધાસિમગ્ને અનૃતસ્ય પાન્તિ ક આસતો વચસઃ સન્તિ ગોપાઃ ॥ ૫.૦૧૨.૦૪
સખાયસ્તે વિષુણા અગ્ન એતે શિવાસઃ સન્તો અશિવા અભૂવન્ ।
અધૂર્ષત સ્વયમેતે વચોભિરૃજૂયતે વૃજિનાનિ બ્રુવન્તઃ ॥ ૫.૦૧૨.૦૫
યસ્તે અગ્ને નમસા યજ્ઞમીટ્ટ ઋતં સ પાત્યરુષસ્ય વૃષ્ણઃ ।
તસ્ય ક્ષયઃ પૃથુરા સાધુરેતુ પ્રસર્સ્રાણસ્ય નહુષસ્ય શેષઃ ॥ ૫.૦૧૨.૦૬
અર્ચન્તસ્ત્વા હવામહેઽર્ચન્તઃ સમિધીમહિ ।
અગ્ને અર્ચન્ત ઊતયે ॥ ૫.૦૧૩.૦૧
અગ્નેઃ સ્તોમં મનામહે સિધ્રમદ્ય દિવિસ્પૃશઃ ।
દેવસ્ય દ્રવિણસ્યવઃ ॥ ૫.૦૧૩.૦૨
અગ્નિર્જુષત નો ગિરો હોતા યો માનુષેષ્વા ।
સ યક્ષદ્દૈવ્યં જનમ્ ॥ ૫.૦૧૩.૦૩
ત્વમગ્ને સપ્રથા અસિ જુષ્ટો હોતા વરેણ્યઃ ।
ત્વયા યજ્ઞં વિ તન્વતે ॥ ૫.૦૧૩.૦૪
ત્વામગ્ને વાજસાતમં વિપ્રા વર્ધન્તિ સુષ્ટુતમ્ ।
સ નો રાસ્વ સુવીર્યમ્ ॥ ૫.૦૧૩.૦૫
અગ્ને નેમિરરાઁ ઇવ દેવાઁસ્ત્વં પરિભૂરસિ ।
આ રાધશ્ચિત્રમૃઞ્જસે ॥ ૫.૦૧૩.૦૬
અગ્નિં સ્તોમેન બોધય સમિધાનો અમર્ત્યમ્ ।
હવ્યા દેવેષુ નો દધત્ ॥ ૫.૦૧૪.૦૧
તમધ્વરેષ્વીળતે દેવં મર્તા અમર્ત્યમ્ ।
યજિષ્ઠં માનુષે જને ॥ ૫.૦૧૪.૦૨

તં હિ શશ્વન્ત ઈળતે સ્રુચા દેવં ઘૃતશ્ચુતા ।

અગ્નિં હવ્યાય વોળ્હવે ॥ ૫.૦૧૪.૦૩

અગ્નિર્જાતો અરોચત ઘ્નન્દસ્યૂઞ્જ્યોતિષા તમઃ ।

અવિન્દદ્ગા અપઃ સ્વઃ ॥ ૫.૦૧૪.૦૪

અગ્નિમીળેન્યં કવિં ઘૃતપૃષ્ઠં સપર્યત ।

વેતુ મે શ઼ૃણવદ્ધવમ્ ॥ ૫.૦૧૪.૦૫

અગ્નિં ઘૃતેન વાવૃધુઃ સ્તોમેભિર્વિશ્વચર્ષણિમ્ ।

સ્વાધીભિર્વચસ્યુભિઃ ॥ ૫.૦૧૪.૦૬

પ્ર વેધસે કવયે વેદ્યાય ગિરં ભરે યશસે પૂર્વ્યાય ।

ઘૃતપ્રસત્તો અસુરઃ સુશેવો રાયો ધર્તા ધરુણો વસ્વો અગ્નિઃ ॥ ૫.૦૧૫.૦૧

ઋતેન ઋતં ધરુણં ધારયન્ત યજ્ઞસ્ય શાકે પરમે વ્યોમન્ ।

દિવો ધર્મન્ધરુણે સેદુષો નૄઞ્જાતૈરજાતાઁ અભિ યે નનક્ષુઃ ॥ ૫.૦૧૫.૦૨

અઙ્હોયુવસ્તન્વસ્તન્વતે વિ વયો મહદ્દુષ્ટરં પૂર્વ્યાય ।

સ સંવતો નવજાતસ્તુતુર્યાત્સિઙ્હં ન ક્રુદ્ધમભિતઃ પરિ ષ્ઠુઃ ॥ ૫.૦૧૫.૦૩

માતેવ યદ્ભરસે પપ્રથાનો જનંજનં ધાયસે ચક્ષસે ચ ।

વયોવયો જરસે યદ્દધાનઃ પરિ ત્મના વિષુરૂપો જિગાસિ ॥ ૫.૦૧૫.૦૪

વાજો નુ તે શવસસ્પાત્વન્તમુરું દોઘં ધરુણં દેવ રાયઃ ।

પદં ન તાયુર્ગુહા દધાનો મહો રાયે ચિતયન્નત્રિમસ્પઃ ॥ ૫.૦૧૫.૦૫

બૃહદ્વયો હિ ભાનવેઽર્ચા દેવાયાગ્નયે ।

યં મિત્રં ન પ્રશસ્તિભિર્મર્તાસો દધિરે પુરઃ ॥ ૫.૦૧૬.૦૧

સ હિ દ્યુભિર્જનાનાં હોતા દક્ષસ્ય બાહ્વોઃ ।

વિ હવ્યમગ્નિરાનુષગ્ભગો ન વારમૃણ્વતિ ॥ ૫.૦૧૬.૦૨

અસ્ય સ્તોમે મઘોનઃ સખ્યે વૃદ્ધશોચિષઃ ।

વિશ્વા યસ્મિન્તુવિષ્વણિ સમર્યે શુષ્મમાદધુઃ ॥ ૫.૦૧૬.૦૩

અધા હ્યગ્ન એષાં સુવીર્યસ્ય મંહના ।

તમિદ્યહ્વં ન રોદસી પરિ શ્રવો બભૂવતુઃ ॥ ૫.૦૧૬.૦૪

નૂ ન એહિ વાર્યમગ્ને ગૃણાન આ ભર ।

યે વયં યે ચ સૂરયઃ સ્વસ્તિ ધામહે સચોતૈધિ પૃત્સુ નો વૃધે ॥ ૫.૦૧૬.૦૫

આ યજ્ઞૈર્દેવ મર્ત્ય ઇત્થા તવ્યાંસમૂતયે ।
અગ્નિં કૃતે સ્વધ્વરે પૂરુરીળીતાવસે ॥ ૫.૦૧૭.૦૧
અસ્ય હિ સ્વયશસ્તર આસા વિધર્મન્મન્યસે ।
તં નાકં ચિત્રશોચિષં મન્દ્રં પરો મનીષયા ॥ ૫.૦૧૭.૦૨
અસ્ય વાસા ઉ અર્ચિષા ય આયુક્ત તુજા ગિરા ।
દિવો ન યસ્ય રેતસા બૃહચ્છોચન્ત્યર્ચયઃ ॥ ૫.૦૧૭.૦૩
અસ્ય ક્રત્વા વિચેતસો દસ્મસ્ય વસુ રથ આ ।
અધા વિશ્વાસુ હવ્યોऽગ્નિર્વિક્ષુ પ્ર શસ્યતે ॥ ૫.૦૧૭.૦૪
નૂ ન ઇદ્ધિ વાર્યમાસા સચન્ત સૂરયઃ ।
ઊર્જો નપાદભિષ્ટયે પાહિ શગ્ધિ સ્વસ્તય ઉતૈધિ પૃત્સુ નો વૃધે ॥ ૫.૦૧૭.૦૫

પ્રાતરગ્નિઃ પુરુપ્રિયો વિશઃ સ્તવેતાતિથિઃ ।
વિશ્વાનિ યો અમર્ત્યો હવ્યા મર્તેષુ રણ્યતિ ॥ ૫.૦૧૮.૦૧
દ્વિતાય મૃક્તવાહસે સ્વસ્ય દક્ષસ્ય મંહના ।
ઇન્દું સ ધત્ત આનુષક્સ્તોતા ચિત્તે અમર્ત્ય ॥ ૫.૦૧૮.૦૨
તં વો દીર્ઘાયુશોચિષં ગિરા હુવે મઘોનામ્ ।
અરિષ્ટો યેષાં રથો વ્યશ્વદાવન્નીયતે ॥ ૫.૦૧૮.૦૩
ચિત્રા વા યેષુ દીધિતિરાસન્નુક્થા પાન્તિ યે ।
સ્તીર્ણં બર્હિઃ સ્વર્ણરે શ્રવાંસિ દધિરે પરિ ॥ ૫.૦૧૮.૦૪
યે મે પઞ્ચાશતં દદુરશ્વાનાં સધસ્તુતિ ।
દ્યુમદગ્ને મહિ શ્રવો બૃહત્કૃધિ મઘોનાં નૃવદમૃત નૃણામ્ ॥ ૫.૦૧૮.૦૫

અભ્યવસ્થાઃ પ્ર જાયન્તે પ્ર વવ્રેર્વવ્રિશ્ચિકેત ।
ઉપસ્થે માતુર્વિ ચષ્ટે ॥ ૫.૦૧૯.૦૧
જુહુરે વિ ચિતયન્તોऽનિમિષં નૃમ્ણં પાન્તિ ।
આ દૃળ્હાં પુરં વિવિશુઃ ॥ ૫.૦૧૯.૦૨
આ શ્વૈત્રેયસ્ય જન્તવો દ્યુમદ્વર્ધન્ત કૃષ્ટયઃ ।
નિષ્કગ્રીવો બૃહદુક્થ એના મધ્વા ન વાજયુઃ ॥ ૫.૦૧૯.૦૩

પ્રિયં દુગ્ધં ન કામ્યમજામિ જામ્યોઃ સચા ।
ઘર્મો ન વાજજઠરોઽદબ્ધઃ શશ્વતો દભઃ ॥ ૫.૦૧૯.૦૪
ક્રીળન્નો રશ્મ આ ભુવઃ સં ભસ્મના વાયુના વેવિદાનઃ ।
તા અસ્ય સન્ધૃષજો ન તિગ્માઃ સુસંશિતા વક્ષ્યો વક્ષણેસ્થાઃ ॥ ૫.૦૧૯.૦૫

યમગ્ને વાજસાતમ ત્વં ચિન્મન્યસે રયિમ્ ।
તં નો ગીર્ભિઃ શ્રવાય્યં દેવત્રા પનયા યુજમ્ ॥ ૫.૦૨૦.૦૧
યે અગ્ને નેરયન્તિ તે વૃદ્ધા ઉગ્રસ્ય શવસઃ ।
અપ દ્વેષો અપ હ્વરોઽન્યવ્રતસ્ય સશ્ચિરે ॥ ૫.૦૨૦.૦૨
હોતારં ત્વા વૃણીમહેઽગ્ને દક્ષસ્ય સાધનમ્ ।
યજ્ઞેષુ પૂર્વ્યં ગિરા પ્રયસ્વન્તો હવામહે ॥ ૫.૦૨૦.૦૩
ઇત્થા યથા ત ઊતયે સહસાવન્દિવેદિવે ।
રાય ઋતાય સુક્રતો ગોભિઃ ષ્યામ સધમાદો વીરૈઃ સ્યામ સધમાદઃ ॥ ૫.૦૨૦.૦૪

મનુષ્વત્ત્વા નિ ધીમહિ મનુષ્વત્સમિધીમહિ ।
અગ્ને મનુષ્વદઙ્ગિરો દેવાન્દેવયતે યજ ॥ ૫.૦૨૧.૦૧
ત્વં હિ માનુષે જનેઽગ્ને સુપ્રીત ઇધ્યસે ।
સ્રુચસ્ત્વા યન્ત્યાનુષક્સુજાત સર્પિરાસુતે ॥ ૫.૦૨૧.૦૨
ત્વાં વિશ્વે સજોષસો દેવાસો દૂતમક્રત ।
સપર્યન્તસ્ત્વા કવે યજ્ઞેષુ દેવમીળતે ॥ ૫.૦૨૧.૦૩
દેવં વો દેવયજ્યયાગ્નિમીળીત મર્ત્યઃ ।
સમિદ્ધઃ શુક્ર દીદિહ્યૃતસ્ય યોનિમાસદઃ સસસ્ય યોનિમાસદઃ ॥ ૫.૦૨૧.૦૪

પ્ર વિશ્વસામન્નત્રિવદર્ચા પાવકશોચિષે ।
યો અધ્વરેષ્વીડ્યો હોતા મન્દ્રતમો વિશિ ॥ ૫.૦૨૨.૦૧
ન્ય૧ગ્નિં જાતવેદસં દધાતા દેવમૃત્વિજમ્ ।
પ્ર યજ્ઞ એત્વાનુષગદ્યા દેવવ્યચસ્તમઃ ॥ ૫.૦૨૨.૦૨
ચિકિત્વિન્મનસં ત્વા દેવં મર્તાસ ઊતયે ।
વરેણ્યસ્ય તેઽવસ ઇયાનાસો અમન્મહિ ॥ ૫.૦૨૨.૦૩
અગ્ને ચિકિદ્ધ્ય૧સ્ય ન ઇદં વચઃ સહસ્ય ।

તં ત્વા સુશિપ્ર દમ્પતે સ્તોમૈર્વર્ધન્ત્યત્રયો ગીર્ભિઃ શુમ્ભન્ત્યત્રયઃ ॥ ૫.૦૨૨.૦૪

અગ્ને સહન્તમા ભર દ્યુમ્નસ્ય પ્રાસહા રયિમ્ ।
વિશ્વા યશ્ચર્ષણીરભ્યાउસા વાજેષુ સાસહત્ ॥ ૫.૦૨૩.૦૧
તમગ્ને પૃતનાષહં રયિં સહસ્વ આ ભર ।
ત્વં હિ સત્યો અદ્ભુતો દાતા વાજસ્ય ગોમતઃ ॥ ૫.૦૨૩.૦૨
વિશ્વે હિ ત્વા સજોષસો જનાસો વૃક્તબર્હિષઃ ।
હોતારં સદ્મસુ પ્રિયં વ્યન્તિ વાર્યા પુરુ ॥ ૫.૦૨૩.૦૩
સ હિ ષ્મા વિશ્વચર્ષણિરભિમાતિ સહો દધે ।
અગ્ન એષુ ક્ષયેષ્વા રેવન્નઃ શુક્ર દીદિહિ દ્યુમત્પાવક દીદિહિ ॥ ૫.૦૨૩.૦૪

અગ્ને ત્વં નો અન્તમ ઉત ત્રાતા શિવો ભવા વરૂથ્યઃ ॥ ૫.૦૨૪.૦૧
વસુરગ્નિર્વસુશ્રવા અચ્છા નક્ષિ દ્યુમત્તમં રયિં દાઃ ॥ ૫.૦૨૪.૦૨
સ નો બોધિ શ્રુધી હવમુરુષ્યા ણો અઘાયતઃ સમસ્માત્ ॥ ૫.૦૨૪.૦૩
તં ત્વા શોચિષ્ઠ દીદિવઃ સુમ્નાય નૂનમીમહે સખિભ્યઃ ॥ ૫.૦૨૪.૦૪

અચ્છા વો અગ્નિમવસે દેવં ગાસિ સ નો વસુઃ ।
રાસત્પુત્ર ઋષૂણામૃતાવા પર્ષતિ દ્વિષઃ ॥ ૫.૦૨૫.૦૧
સ હિ સત્યો યં પૂર્વે ચિદ્દેવાસશ્ચિદ્યમીધિરે ।
હોતારં મન્દ્રજિહ્વમિત્સુદીતિભિર્વિભાવસુમ્ ॥ ૫.૦૨૫.૦૨
સ નો ધીતી વરિષ્ઠયા શ્રેષ્ઠયા ચ સુમત્યા ।
અગ્ને રાયો દિદીહિ નઃ સુવૃક્તિભિર્વરેણ્ય ॥ ૫.૦૨૫.૦૩
અગ્નિર્દેવેષુ રાજત્યગ્નિર્મર્તેષ્વાવિશન્ ।
અગ્નિર્નો હવ્યવાહનોऽગ્નિં ધીભિઃ સપર્યત ॥ ૫.૦૨૫.૦૪
અગ્નિસ્તુવિશ્રવસ્તમં તુવિબ્રહ્માણમુત્તમમ્ ।
અતૂર્તં શ્રાવયત્પતિં પુત્રં દદાતિ દાશુષે ॥ ૫.૦૨૫.૦૫
અગ્નિર્દદાતિ સત્પતિં સાસાહ યો યુધા નૃભિઃ ।
અગ્નિરત્યં રઘુષ્યદં જેતારમપરાજિતમ્ ॥ ૫.૦૨૫.૦૬
યદ્વાહિષ્ઠં તદગ્નયે બૃહદર્ચ વિભાવસો ।
મહિષીવ ત્વદ્રયિસ્ત્વદ્વાજા ઉદીરતે ॥ ૫.૦૨૫.૦૭

તવ દ્યુમન્તો અર્ચયો ગ્રાવેવોચ્યતે બૃહત્ ।
ઉતો તે તન્યતુર્યથા સ્વાનો અર્ત ત્મના દિવઃ ॥ ૫.૦૨૫.૦૮
એવાઁ અગ્નિં વસૂયવઃ સહસાનં વવન્દિમ ।
સ નો વિશ્વા અતિ દ્વિષઃ પર્ષન્નાવેવ સુક્રતુઃ ॥ ૫.૦૨૫.૦૯
અગ્ને પાવક રોચિષા મન્દ્રયા દેવ જિહ્વયા ।
આ દેવાન્વક્ષિ યક્ષિ ચ ॥ ૫.૦૨૬.૦૧
તં ત્વા ઘૃતસ્નવીમહે ચિત્રભાનો સ્વર્દૃશમ્ ।
દેવાઁ આ વીતયે વહ ॥ ૫.૦૨૬.૦૨
વીતિહોત્રં ત્વા કવે દ્યુમન્તં સમિધીમહિ ।
અગ્ને બૃહન્તમધ્વરે ॥ ૫.૦૨૬.૦૩
અગ્ને વિશ્વેભિરા ગહિ દેવેભિર્હવ્યદાતયે ।
હોતારં ત્વા વૃણીમહે ॥ ૫.૦૨૬.૦૪
યજમાનાય સુન્વત આગ્ને સુવીર્યં વહ ।
દેવૈરા સત્સિ બર્હિષિ ॥ ૫.૦૨૬.૦૫
સમિધાનઃ સહસ્રજિદગ્ને ધર્માણિ પુષ્યસિ ।
દેવાનાં દૂત ઉક્થ્યઃ ॥ ૫.૦૨૬.૦૬
ન્યગ્નિં જાતવેદસં હોત્રવાહં યવિષ્ઠ્યમ્ ।
દધાતા દેવમૃત્વિજમ્ ॥ ૫.૦૨૬.૦૭
પ્ર યજ્ઞ એત્વાનુષગદ્યા દેવવ્યચસ્તમઃ ।
સ્તૃણીત બર્હિરાસદે ॥ ૫.૦૨૬.૦૮
એદં મરુતો અશ્વિના મિત્રઃ સીદન્તુ વરુણઃ ।
દેવાસઃ સર્વયા વિશા ॥ ૫.૦૨૬.૦૯
અનસ્વન્તા સત્પતિર્મામહે મે ગાવા ચેતિષ્ઠો અસુરો મઘોનઃ ।
ત્રૈવૃષ્ણો અગ્ને દશભિઃ સહસ્રૈર્વૈશ્વાનર ત્ર્યરુણશ્ચિકેત ॥ ૫.૦૨૭.૦૧
યો મે શતા ચ વિંશતિં ચ ગોનાં હરી ચ યુક્તા સુધુરા દદાતિ ।
વૈશ્વાનર સુષ્ટુતો વાવૃધાનોઽગ્ને યચ્છ ત્ર્યરુણાય શર્મ ॥ ૫.૦૨૭.૦૨
એવા તે અગ્ને સુમતિં ચકાનો નવિષ્ઠાય નવમં ત્રસદસ્યુઃ ।

યો મે ગિરસ્તુવિજાતસ્ય પૂર્વીર્યુક્તેનાભિ ત્ર્યરુણો ગૃણાતિ ॥ ૫.૦૨૭.૦૩
યો મ ઇતિ પ્રવોચત્યશ્વમેધાય સૂરયે ।
દદૃચા સનિં યતે દદન્મેધામૃતાયતે ॥ ૫.૦૨૭.૦૪
યસ્ય મા પરુષાઃ શતમુદ્ધર્ષયન્ત્યુક્ષણઃ ।
અશ્વમેધસ્ય દાનાઃ સોમા ઇવ ત્ર્યાશિરઃ ॥ ૫.૦૨૭.૦૫
ઇન્દ્રાગ્ની શતદાવ્ન્યશ્વમેધે સુવીર્યમ્ ।
ક્ષત્રં ધારયતં બૃહદ્દિવિ સૂર્યમિવાજરમ્ ॥ ૫.૦૨૭.૦૬
સમિદ્ધો અગ્નિર્દિવિ શોચિરશ્રેત્પ્રત્યઙ્ઙુષસમુર્વિયા વિ ભાતિ ।
એતિ પ્રાચી વિશ્વવારા નમોભિર્દેવાઁ ઈળાના હવિષા ઘૃતાચી ॥ ૫.૦૨૮.૦૧
સમિધ્યમાનો અમૃતસ્ય રાજસિ હવિષ્કૃણ્વન્તં સચસે સ્વસ્તયે ।
વિશ્વં સ ધત્તે દ્રવિણં યમિન્વસ્યાતિથ્યમગ્ને નિ ચ ધત્ત ઇત્પુરઃ ॥ ૫.૦૨૮.૦૨
અગ્ને શર્ધ મહતે સૌભગાય તવ દ્યુમ્નાન્યુત્તમાનિ સન્તુ ।
સં જાસ્પત્યં સુયમમા કૃણુષ્વ શત્રૂયતામભિ તિષ્ઠા મહાંસિ ॥ ૫.૦૨૮.૦૩
સમિદ્ધસ્ય પ્રમહસોઽગ્ને વન્દે તવ શ્રિયમ્ ।
વૃષભો દ્યુમ્નવાઁ અસિ સમધ્વરેષ્વિધ્યસે ॥ ૫.૦૨૮.૦૪
સમિદ્ધો અગ્ન આહુત દેવાન્યક્ષિ સ્વધ્વર ।
ત્વં હિ હવ્યવાળસિ ॥ ૫.૦૨૮.૦૫
આ જુહોતા દુવસ્યતાગ્નિં પ્રયત્યધ્વરે ।
વૃણીધ્વં હવ્યવાહનમ્ ॥ ૫.૦૨૮.૦૬
ત્ર્યર્યમા મનુષો દેવતાતા ત્રી રોચના દિવ્યા ધારયન્ત ।
અર્ચન્તિ ત્વા મરુતઃ પૂતદક્ષાસ્ત્વમેષામૃષિરિન્દ્રાસિ ધીરઃ ॥ ૫.૦૨૯.૦૧
અનુ યદીં મરુતો મન્દસાનમાર્ચન્નિન્દ્રં પપિવાંસં સુતસ્ય ।
આદત્ત વજ્રમભિ યદહિં હન્નપો યહ્વીરસૃજત્સર્તવા ઉ ॥ ૫.૦૨૯.૦૨
ઉત બ્રહ્માણો મરુતો મે અસ્યેન્દ્રઃ સોમસ્ય સુષુતસ્ય પેયાઃ ।
તદ્ધિ હવ્યં મનુષે ગા અવિન્દદહન્નહિં પપિવાઁ ઇન્દ્રો અસ્ય ॥ ૫.૦૨૯.૦૩
આદ્રોદસી વિતરં વિ ષ્કભાયત્સંવિવ્યાનશ્ચિદ્ભિયસે મૃગં કઃ ।
જિગર્તિમિન્દ્રો અપજર્ગુરાણઃ પ્રતિ શ્વસન્તમવ દાનવં હન્ ॥ ૫.૦૨૯.૦૪

અધ ક્રત્વા મઘવન્તુભ્યં દેવા અનુ વિશ્વે અદદુઃ સોમપેયમ્ ।
યત્સૂર્યસ્ય હરિતઃ પતન્તીઃ પુરઃ સતીરુપરા એતશે કઃ ॥ ૫.૦૨૯.૦૫
નવ યદસ્ય નવતિં ચ ભોગાન્સાકં વજ્રેણ મઘવા વિવૃશ્ચત્ ।
અર્ચન્તીન્દ્રં મરુતઃ સધસ્થે ત્રૈષ્ટુભેન વચસા બાધત દ્યામ્ ॥ ૫.૦૨૯.૦૬
સખા સખ્યે અપચત્તૂયમગ્નિરસ્ય ક્રત્વા મહિષા ત્રી શતાનિ ।
ત્રી સાકમિન્દ્રો મનુષઃ સરાંસિ સુતં પિબદ્વૃત્રહત્યાય સોમમ્ ॥ ૫.૦૨૯.૦૭
ત્રી યચ્છતા મહિષાણામઘો માસ્ત્રી સરાંસિ મઘવા સોમ્યાપાઃ ।
કારં ન વિશ્વે અહ્વન્ત દેવા ભરમિન્દ્રાય યદહિં જઘાન ॥ ૫.૦૨૯.૦૮
ઉશના યત્સહસ્યૈરયાતં ગૃહમિન્દ્ર જૂજુવાનેભિરશ્વૈઃ ।
વન્વાનો અત્ર સરથં યયાથ કુત્સેન દેવૈરવનોર્હ શુષ્ણમ્ ॥ ૫.૦૨૯.૦૯
પ્રાન્યચ્ચક્રમવૃહઃ સૂર્યસ્ય કુત્સાયાન્યદ્વરિવો યાતવેઽકઃ ।
અનાસો દસ્યૂઁરમૃણો વધેન નિ દુર્યોણ આવૃણઙ્મૃધ્રવાચઃ ॥ ૫.૦૨૯.૧૦
સ્તોમાસસ્ત્વા ગૌરિવીતેરવર્ધન્નરન્ધયો વૈદથિનાય પિપ્રુમ્ ।
આ ત્વામૃજિશ્વા સખ્યાય ચક્રે પચન્પક્તીરપિબઃ સોમમસ્ય ॥ ૫.૦૨૯.૧૧
નવગ્વાસઃ સુતસોમાસ ઇન્દ્રં દશગ્વાસો અભ્યર્ચન્ત્યર્કૈઃ ।
ગવ્યં ચિદૂર્વમપિધાનવન્તં તં ચિન્નરઃ શશમાના અપ વ્રન્ ॥ ૫.૦૨૯.૧૨
કથો નુ તે પરિ ચરાણિ વિદ્વાન્વીર્યા મઘવન્યા ચકર્થ ।
યા ચો નુ નવ્યા કૃણવઃ શવિષ્ઠ પ્રેદુ તા તે વિદથેષુ બ્રવામ ॥ ૫.૦૨૯.૧૩
એતા વિશ્વા ચકૃવાઁ ઇન્દ્ર ભૂર્યપરીતો જનુષા વીર્યેણ ।
યા ચિન્નુ વજ્રિન્કૃણવો દધૃષ્વાન્ન તે વર્તા તવિષ્યા અસ્તિ તસ્યાઃ ॥ ૫.૦૨૯.૧૪
ઇન્દ્ર બ્રહ્મ ક્રિયમાણા જુષસ્વ યા તે શવિષ્ઠ નવ્યા અકર્મ ।
વસ્ત્રેવ ભદ્રા સુકૃતા વસૂયૂ રથં ન ધીરઃ સ્વપા અતક્ષમ્ ॥ ૫.૦૨૯.૧૫
ક્વ૧ સ્ય વીરઃ કો અપશ્યદિન્દ્રં સુખરથમીયમાનં હરિભ્યામ્ ।
યો રાયા વજ્રી સુતસોમમિચ્છન્તદોકો ગન્તા પુરુહૂત ઊતી ॥ ૫.૦૩૦.૦૧
અવાચચક્ષં પદમસ્ય સસ્વરુગ્રં નિધાતુરન્વાયમિચ્છન્ ।
અપૃચ્છમન્યાઁ ઉત તે મ આહુરિન્દ્રં નરો બુબુધાના અશેમ ॥ ૫.૦૩૦.૦૨
પ્ર નુ વયં સુતે યા તે કૃતાનીન્દ્ર બ્રવામ યાનિ નો જુજોષઃ ।

વેદદવિદ્વાઞ્છૃણવચ્ચ વિદ્વાન્વહતેઽયં મઘવા સર્વસેનઃ ॥ ૫.૦૩૦.૦૩
સ્થિરં મનશ્ચકૃષે જાત ઇન્દ્ર વેષીદેકો યુધયે ભૂયસશ્ચિત્ ।
અશ્માનં ચિચ્છવસા દિદ્યુતો વિ વિદો ગવામૂર્વમુસ્રિયાણામ્ ॥ ૫.૦૩૦.૦૪
પરો યત્ત્વં પરમ આજનિષ્ઠાઃ પરાવતિ શ્રુત્યં નામ બિભ્રત્ ।
અતશ્ચિદિન્દ્રાદભયન્ત દેવા વિશ્વા અપો અજયદ્દાસપત્નીઃ ॥ ૫.૦૩૦.૦૫
તુભ્યેદેતે મરુતઃ સુશેવા અર્ચન્ત્યર્કં સુન્વન્ત્યન્ધઃ ।
અહિમોહાનમપ આશયાનં પ્ર માયાભિર્માયિનં સક્ષદિન્દ્રઃ ॥ ૫.૦૩૦.૦૬
વિ ષૂ મૃધો જનુષા દાનમિન્વન્નહન્ગવા મઘવન્સંચકાનઃ ।
અત્રા દાસસ્ય નમુચેઃ શિરો યદવર્તયો મનવે ગાતુમિચ્છન્ ॥ ૫.૦૩૦.૦૭
યુજં હિ મામકૃથા આદિદિન્દ્ર શિરો દાસસ્ય નમુચેર્મથાયન્ ।
અશ્માનં ચિત્સ્વર્યં વર્તમાનં પ્ર ચક્રિયેવ રોદસી મરુદ્ભ્યઃ ॥ ૫.૦૩૦.૦૮
સ્ત્રિયો હિ દાસ આયુધાનિ ચક્રે કિં મા કરન્નબલા અસ્ય સેનાઃ ।
અન્તર્હ્યખ્યદુભે અસ્ય ધેને અથોપ પ્રૈદ્યુધયે દસ્યુમિન્દ્રઃ ॥ ૫.૦૩૦.૦૯
સમત્ર ગાવોઽભિતોઽનવન્તેહેહ વત્સૈર્વિયુતા યદાસન્ ।
સં તા ઇન્દ્રો અસૃજદસ્ય શાકૈર્યદીં સોમાસઃ સુષુતા અમન્દન્ ॥ ૫.૦૩૦.૧૦
યદીં સોમા બભ્રુધૂતા અમન્દન્નરોરવીદ્વૃષભઃ સાદનેષુ ।
પુરંદરઃ પપિવાઁ ઇન્દ્રો અસ્ય પુનર્ગવામદદાદુસ્રિયાણામ્ ॥ ૫.૦૩૦.૧૧
ભદ્રમિદં રુશમા અગ્ને અક્રન્ગવાં ચત્વારિ દદતઃ સહસ્રા ।
ઋણંચયસ્ય પ્રયતા મઘાનિ પ્રત્યગ્રભીષ્મ નૃતમસ્ય નૃણામ્ ॥ ૫.૦૩૦.૧૨
સુપેશસં માવ સૃજન્ત્યસ્તં ગવાં સહસ્રૈ રુશમાસો અગ્ને ।
તીવ્રા ઇન્દ્રમમમન્દુઃ સુતાસોઽક્તોર્વ્યુષ્ટૌ પરિતક્મ્યાયાઃ ॥ ૫.૦૩૦.૧૩
ઔચ્છત્સા રાત્રી પરિતક્મ્યા યાઁ ઋણંચયે રાજનિ રુશમાનામ્ ।
અત્યો ન વાજી રઘુરજ્યમાનો બભ્રુશ્ચત્વાર્યસનત્સહસ્રા ॥ ૫.૦૩૦.૧૪
ચતુઃસહસ્રં ગવ્યસ્ય પશ્વઃ પ્રત્યગ્રભીષ્મ રુશમેષ્વગ્ને ।
ઘર્મશ્ચિત્તપ્તઃ પ્રવૃજે ય આસીદયસ્મયસ્તમ્વાદામ વિપ્રાઃ ॥ ૫.૦૩૦.૧૫
ઇન્દ્રો રથાય પ્રવતં કૃણોતિ યમધ્યસ્થાન્મઘવા વાજયન્તમ્ ।
યૂથેવ પશ્વો વ્યુનોતિ ગોપા અરિષ્ટો યાતિ પ્રથમઃ સિષાસન્ ॥ ૫.૦૩૧.૦૧

આ પ્ર દ્રવ હરિવો મા વિ વેનઃ પિશઙ્ગરાતે અભિ નઃ સચસ્વ ।
નહિ ત્વદિન્દ્ર વસ્યો અન્યદસ્ત્યમેનાઁશ્ચિજ્જનિવતશ્ચકર્થ ॥ ૫.૦૩૧.૦૨
ઉદ્યત્સહઃ સહસ આજનિષ્ટ દેદિષ્ટ ઇન્દ્ર ઇન્દ્રિયાણિ વિશ્વા ।
પ્રાચોદયત્સુદુઘા વવ્રે અન્તર્વિ જ્યોતિષા સંવવૃત્વત્તમોઽવઃ ॥ ૫.૦૩૧.૦૩
અનવસ્તે રથમશ્વાય તક્ષન્ત્વષ્ટા વજ્રં પુરુહૂત દ્યુમન્તમ્ ।
બ્રહ્માણ ઇન્દ્રં મહયન્તો અર્કૈરવર્ધયન્નહયે હન્તવા ઉ ॥ ૫.૦૩૧.૦૪
વૃષ્ણે યત્તે વૃષણો અર્કમર્ચાનિન્દ્ર ગ્રાવાણો અદિતિઃ સજોષાઃ ।
અનશ્વાસો યે પવયોઽરથા ઇન્દ્રેષિતા અભ્યવર્તન્ત દસ્યૂન્ ॥ ૫.૦૩૧.૦૫
પ્ર તે પૂર્વાણિ કરણાનિ વોચં પ્ર નૂતના મઘવન્યા ચકર્થ ।
શક્તીવો યદ્વિભરા રોદસી ઉભે જયન્નપો મનવે દાનુચિત્રાઃ ॥ ૫.૦૩૧.૦૬
તદિન્નુ તે કરણં દસ્મ વિપ્રાહિં યદ્ઘ્નન્નોજો અત્રામિમીથાઃ ।
શુષ્ણસ્ય ચિત્પરિ માયા અગૃભ્ણાઃ પ્રપિત્વં યન્નપ દસ્યૂઁરસેધઃ ॥ ૫.૦૩૧.૦૭
ત્વમપો યદવે તુર્વશાયારમયઃ સુદુઘાઃ પાર ઇન્દ્ર ।
ઉગ્રમયાતમવહો હ કુત્સં સં હ યદ્વામુશનારન્ત દેવાઃ ॥ ૫.૦૩૧.૦૮
ઇન્દ્રાકુત્સા વહમાના રથેના વામત્યા અપિ કર્ણે વહન્તુ ।
નિઃ ષીમદ્ભ્યો ધમથો નિઃ ષધસ્થાન્મઘોનો હૃદો વરથસ્તમાંસિ ॥ ૫.૦૩૧.૦૯
વાતસ્ય યુક્તાન્સુયુજશ્ચિદશ્વાન્કવિશ્ચિદેષો અજગન્નવસ્યુઃ ।
વિશ્વે તે અત્ર મરુતઃ સખાય ઇન્દ્ર બ્રહ્માણિ તવિષીમવર્ધન્ ॥ ૫.૦૩૧.૧૦
સૂરશ્ચિદ્રથં પરિતક્મ્યાયાં પૂર્વં કરદુપરં જૂજુવાંસમ્ ।
ભરચ્ચક્રમેતશઃ સં રિણાતિ પુરો દધત્સનિષ્યતિ ક્રતું નઃ ॥ ૫.૦૩૧.૧૧
આયં જના અભિચક્ષે જગામેન્દ્રઃ સખાયં સુતસોમમિચ્છન્ ।
વદન્ગ્રાવાવ વેદિં ભ્રિયાતે યસ્ય જીરમધ્વર્યવશ્ચરન્તિ ॥ ૫.૦૩૧.૧૨
યે ચાકનન્ત ચાકનન્ત નૂ તે મર્તા અમૃત મો તે અંહ આરન્ ।
વાવન્ધિ યજ્યૂઁરુત તેષુ ધેહ્યોજો જનેષુ યેષુ તે સ્યામ ॥ ૫.૦૩૧.૧૩

અદર્દરુત્સમસૃજો વિ ખાનિ ત્વમર્ણવાન્બદ્બધાનાઁ અરમ્ણાઃ ।
મહાન્તમિન્દ્ર પર્વતં વિ યદ્વઃ સૃજો વિ ધારા અવ દાનવં હન્ ॥ ૫.૦૩૨.૦૧
ત્વમુત્સાઁ ઋતુભિર્બદ્બધાનાઁ અરંહ ઊધઃ પર્વતસ્ય વજ્રિન્ ।

અહિં ચિદુગ્ર પ્રયુતં શયાનં જઘન્વાઁ ઇન્દ્ર તવિષીમધત્થાઃ ॥ ૫.૦૩૨.૦૨
ત્યસ્ય ચિન્મહતો નિર્મૃગસ્ય વધર્જઘાન તવિષીભિરિન્દ્રઃ ।
ય એક ઇદપ્રતિર્મન્યમાન આદસ્માદન્યો અજનિષ્ટ તવ્યાન્ ॥ ૫.૦૩૨.૦૩
ત્યં ચિદેષાં સ્વધયા મદન્તં મિહો નપાતં સુવૃધં તમોગામ્ ।
વૃષપ્રભર્મા દાનવસ્ય ભામં વજ્રેણ વજ્રી નિ જઘાન શુષ્ણમ્ ॥ ૫.૦૩૨.૦૪
ત્યં ચિદસ્ય ક્રતુભિર્નિષત્તમમર્મણો વિદદિદસ્ય મર્મ ।
યદીં સુક્ષત્ર પ્રભૃતા મદસ્ય યુયુત્સન્તં તમસિ હર્મ્યે ધાઃ ॥ ૫.૦૩૨.૦૫
ત્યં ચિદિત્થા કત્પયં શયાનમસૂર્યે તમસિ વાવૃધાનમ્ ।
તં ચિન્મન્દાનો વૃષભઃ સુતસ્યોચ્ચૈરિન્દ્રો અપગૂર્યા જઘાન ॥ ૫.૦૩૨.૦૬
ઉદ્યદિન્દ્રો મહતે દાનવાય વધર્યમિષ્ટ સહો અપ્રતીતમ્ ।
યદીં વજ્રસ્ય પ્રભૃતૌ દદાભ વિશ્વસ્ય જન્તોરધમં ચકાર ॥ ૫.૦૩૨.૦૭
ત્યં ચિદર્ણં મધુપં શયાનમસિન્વં વવ્રં મહ્યાદદુગ્રઃ ।
અપાદમત્રં મહતા વધેન નિ દુર્યોણ આવૃણઙ્મૃધ્રવાચમ્ ॥ ૫.૦૩૨.૦૮
કો અસ્ય શુષ્મં તવિષીં વરાત એકો ધના ભરતે અપ્રતીતઃ ।
ઇમે ચિદસ્ય જ્રયસો નુ દેવી ઇન્દ્રસ્યૌજસો ભિયસા જિહાતે ॥ ૫.૦૩૨.૦૯
ન્યસ્મૈ દેવી સ્વધિતિર્જિહીત ઇન્દ્રાય ગાતુરુશતીવ યેમે ।
સં યદોજો યુવતે વિશ્વમાભિરનુ સ્વધાવ્ને ક્ષિતયો નમન્ત ॥ ૫.૦૩૨.૧૦
એકં નુ ત્વા સત્પતિં પાઞ્ચજન્યં જાતં શ◌ૃણોમિ યશસં જનેષુ ।
તં મે જગૃભ્ર આશસો નવિષ્ઠં દોષા વસ્તોર્હવમાનાસ ઇન્દ્રમ્ ॥ ૫.૦૩૨.૧૧
એવા હિ ત્વામૃતુથા યાતયન્તં મઘા વિપ્રેભ્યો દદતં શ◌ૃણોમિ ।
કિં તે બ્રહ્માણો ગૃહતે સખાયો યે ત્વાયા નિદધુઃ કામમિન્દ્ર ॥ ૫.૦૩૨.૧૨
મહિ મહે તવસે દીધ્યે નૄનિન્દ્રાયેત્થા તવસે અતવ્યાન્ ।
યો અસ્મૈ સુમતિં વાજસાતૌ સ્તુતો જને સમર્યશ્ચિકેત ॥ ૫.૦૩૩.૦૧
સ ત્વં ન ઇન્દ્ર ધિયસાનો અર્કૈર્હરીણાં વૃષન્યોક્ત્રમશ્રેઃ ।
યા ઇત્થા મઘવન્નનુ જોષં વક્ષો અભિ પ્રાર્યઃ સક્ષિ જનાન્ ॥ ૫.૦૩૩.૦૨
ન તે ત ઇન્દ્રાભ્ય૧સ્મદૃષ્વાયુક્તાસો અબ્રહ્મતા યદસન્ ।
તિષ્ઠા રથમધિ તં વજ્રહસ્તા રશ્મિં દેવ યમસે સ્વશ્વઃ ॥ ૫.૦૩૩.૦૩

પુરૂ યત્ત ઇન્દ્ર સન્ત્યુક્થા ગવે ચકર્થોર્વરાસુ યુધ્યન્ ।
તતક્ષે સૂર્યાય ચિદોકસિ સ્વે વૃષા સમત્સુ દાસસ્ય નામ ચિત્ ॥ ૫.૦૩૩.૦૪
વયં તે ત ઇન્દ્ર યે ચ નરઃ શર્ધો જજ્ઞાના યાતાશ્ચ રથાઃ ।
આસ્માઞ્જગમ્યાદહિશુષ્મ સત્વા ભગો ન હવ્યઃ પ્રભૃથેષુ ચારુઃ ॥ ૫.૦૩૩.૦૫
પપૃક્ષેણ્યમિન્દ્ર ત્વે હ્યોજો નૃમ્ણાનિ ચ નૃતમાનો અમર્તઃ ।
સ ન એનીં વસવાનો રયિં દાઃ પ્રાર્યઃ સ્તુષે તુવિમઘસ્ય દાનમ્ ॥ ૫.૦૩૩.૦૬
એવા ન ઇન્દ્રોતિભિરવ પાહિ ગૃણતઃ શૂર કારૂન્ ।
ઉત ત્વચં દદતો વાજસાતૌ પિપ્રીહિ મધ્વઃ સુષુતસ્ય ચારોઃ ॥ ૫.૦૩૩.૦૭
ઉત ત્યે મા પૌરુકુત્સ્યસ્ય સૂરેસ્ત્રસદસ્યોર્હિરણિનો રરાણાઃ ।
વહન્તુ મા દશ શ્યેતાસો અસ્ય ગૈરિક્ષિતસ્ય ક્રતુભિર્નુ સશ્ચે ॥ ૫.૦૩૩.૦૮
ઉત ત્યે મા મારુતાશ્વસ્ય શોણાઃ ક્રત્વામઘાસો વિદથસ્ય રાતૌ ।
સહસ્રા મે ચ્યવતાનો દદાન આનૂકમર્યો વપુષે નાર્ચત્ ॥ ૫.૦૩૩.૦૯
ઉત ત્યે મા ધ્વન્યસ્ય જુષ્ટા લક્ષ્મણ્યસ્ય સુરુચો યતાનાઃ ।
મહ્ના રાયઃ સંવરણસ્ય ઋષેર્વ્રજં ન ગાવઃ પ્રયતા અપિ ગ્મન્ ॥ ૫.૦૩૩.૧૦

અજાતશત્રુમજરા સ્વર્વત્યનુ સ્વધામિતા દસ્મમીયતે ।
સુનોતન પચત બ્રહ્મવાહસે પુરુષ્ટુતાય પ્રતરં દધાતન ॥ ૫.૦૩૪.૦૧
આ યઃ સોમેન જઠરમપિપ્રતામન્દત મઘવા મધ્વો અન્ધસઃ ।
યદીં મૃગાય હન્તવે મહાવધઃ સહસ્રભૃષ્ટિમુશના વધં યમત્ ॥ ૫.૦૩૪.૦૨
યો અસ્મૈ ઘ્રંસ ઉત વા ય ઊધનિ સોમં સુનોતિ ભવતિ દ્યુમાઁ અહ ।
અપાપ શક્રસ્તતનુષ્ટિમૂહતિ તનૂશુભ્રં મઘવા યઃ કવાસખઃ ॥ ૫.૦૩૪.૦૩
યસ્યાવધીત્પિતરં યસ્ય માતરં યસ્ય શક્રો ભ્રાતરં નાત ઈષતે ।
વેતીદ્વસ્ય પ્રયતા યતંકરો ન કિલ્બિષાદીષતે વસ્વ આકરઃ ॥ ૫.૦૩૪.૦૪
ન પઞ્ચભિર્દશભિર્વષ્ટ્યારભં નાસુન્વતા સચતે પુષ્યતા ચન ।
જિનાતિ વેદમુયા હન્તિ વા ધુનિરા દેવયું ભજતિ ગોમતિ વ્રજે ॥ ૫.૦૩૪.૦૫
વિત્વક્ષણઃ સમૃતૌ ચક્રમાસજોઽસુન્વતો વિષુણઃ સુન્વતો વૃધઃ ।
ઇન્દ્રો વિશ્વસ્ય દમિતા વિભીષણો યથાવશં નયતિ દાસમાર્યઃ ॥ ૫.૦૩૪.૦૬
સમીં પણેરજતિ ભોજનં મુષે વિ દાશુષે ભજતિ સૂનરં વસુ ।

દુર્ગે ચન ધ્રિયતે વિશ્વ આ પુરુ જનો યો અસ્ય તવિષીમચુક્રુધત્ ॥ ૫.૦૩૪.૦૭
સં યજ્જનૌ સુધનૌ વિશ્વશર્ધસાવવેદિન્દ્રો મઘવા ગોષુ શુભ્રિષુ ।
યુજં હ્યન્યમકૃત પ્રવેપન્યુદીં ગવ્યં સૃજતે સત્વભિર્ધુનિઃ ॥ ૫.૦૩૪.૦૮
સહસ્રસામાગ્નિવેશિં ગૃણીષે શત્રિમગ્ન ઉપમાં કેતુમર્યઃ ।
તસ્મા આપઃ સંયતઃ પીપયન્ત તસ્મિન્ક્ષત્રમમવત્ત્વેષમસ્તુ ॥ ૫.૦૩૪.૦૯

યસ્તે સાધિષ્ઠોઽવસ ઇન્દ્ર ક્રતુષ્ટમા ભર ।
અસ્મભ્યં ચર્ષણીસહં સસ્નિં વાજેષુ દુષ્ટરમ્ ॥ ૫.૦૩૫.૦૧
યદિન્દ્ર તે ચતસ્રો યચ્છૂર સન્તિ તિસ્રઃ ।
યદ્વા પઞ્ચ ક્ષિતીનામવસ્તત્સુ ન આ ભર ॥ ૫.૦૩૫.૦૨
આ તેઽવો વરેણ્યં વૃષન્તમસ્ય હૂમહે ।
વૃષજૂતિર્હિ જજ્ઞિષ આભૂભિરિન્દ્ર તુર્વણિઃ ॥ ૫.૦૩૫.૦૩
વૃષા હ્યસિ રાધસે જજ્ઞિષે વૃષ્ણિ તે શવઃ ।
સ્વક્ષત્રં તે ધૃષન્મનઃ સત્રાહમિન્દ્ર પૌંસ્યમ્ ॥ ૫.૦૩૫.૦૪
ત્વં તમિન્દ્ર મર્ત્યમમિત્રયન્તમદ્રિવઃ ।
સર્વરથા શતક્રતો નિ યાહિ શવસસ્પતે ॥ ૫.૦૩૫.૦૫
ત્વામિદ્વૃત્રહન્તમ જનાસો વૃક્તબર્હિષઃ ।
ઉગ્રં પૂર્વીષુ પૂર્વ્યં હવન્તે વાજસાતયે ॥ ૫.૦૩૫.૦૬
અસ્માકમિન્દ્ર દુષ્ટરં પુરોયાવાનમાજિષુ ।
સયાવાનં ધનેધને વાજયન્તમવા રથમ્ ॥ ૫.૦૩૫.૦૭
અસ્માકમિન્દ્રેહિ નો રથમવા પુરંધ્યા ।
વયં શવિષ્ઠ વાર્યં દિવિ શ્રવો દધીમહિ દિવિ સ્તોમં મનામહે ॥ ૫.૦૩૫.૦૮

સ આ ગમદિન્દ્રો યો વસૂનાં ચિકેતદ્દાતું દામનો રયીણામ્ ।
ધન્વચરો ન વંસગસ્તૃષાણશ્ચકમાનઃ પિબતુ દુગ્ધમંશુમ્ ॥ ૫.૦૩૬.૦૧
આ તે હનૂ હરિવઃ શૂર શિપ્રે રુહત્સોમો ન પર્વતસ્ય પૃષ્ઠે ।
અનુ ત્વા રાજન્નર્વતો ન હિન્વન્ગીર્ભિર્મદેમ પુરુહૂત વિશ્વે ॥ ૫.૦૩૬.૦૨
ચક્રં ન વૃત્તં પુરુહૂત વેપતે મનો ભિયા મે અમતેરિદદ્રિવઃ ।
રથાદધિ ત્વા જરિતા સદાવૃધ કુવિન્નુ સ્તોષન્મઘવન્પુરૂવસુઃ ॥ ૫.૦૩૬.૦૩

એષ ગ્રાવેવ જરિતા ત ઇન્દ્રેયર્તિ વાચં બૃહદાશુષાણઃ ।
પ્ર સવ્યેન મઘવન્યંસિ રાયઃ પ્ર દક્ષિણિદ્ધરિવો મા વિ વેનઃ ॥ ૫.૦૩૬.૦૪
વૃષા ત્વા વૃષણં વર્ધતુ દ્યૌર્વૃષા વૃષભ્યાં વહસે હરિભ્યામ્ ।
સ નો વૃષા વૃષરથઃ સુશિપ્ર વૃષક્રતો વૃષા વજ્રિન્ભરે ધાઃ ॥ ૫.૦૩૬.૦૫
યો રોહિતૌ વાજિનૌ વાજિનીવાન્ત્રિભિઃ શતૈઃ સચમાનાવદિષ્ટ ।
યૂને સમસ્મૈ ક્ષિતયો નમન્તાં શ્રુતરથાય મરુતો દુવોયા ॥ ૫.૦૩૬.૦૬

સં ભાનુના યતતે સૂર્યસ્યાજુહ્વાનો ઘૃતપૃષ્ઠઃ સ્વઞ્ચાઃ ।
તસ્મા અમૃધ્રા ઉષસો વ્યુચ્છાન્ય ઇન્દ્રાય સુનવામેત્યાહ ॥ ૫.૦૩૭.૦૧
સમિદ્ધાગ્નિર્વનવત્સ્તીર્ણબર્હિર્યુક્તગ્રાવા સુતસોમો જરાતે ।
ગ્રાવાણો યસ્યેષિરં વદન્ત્યયદધ્વર્યુર્હવિષાવ સિન્ધુમ્ ॥ ૫.૦૩૭.૦૨
વધૂરિયં પતિમિચ્છન્ત્યેતિ ય ઈં વહાતે મહિષીમિષિરામ્ ।
આસ્ય શ્રવસ્યાદ્રથ આ ચ ઘોષાત્પુરૂ સહસ્રા પરિ વર્તયાતે ॥ ૫.૦૩૭.૦૩
ન સ રાજા વ્યથતે યસ્મિન્નિન્દ્રસ્તીવ્રં સોમં પિબતિ ગોસખાયમ્ ।
આ સત્વનૈરજતિ હન્તિ વૃત્રં ક્ષેતિ ક્ષિતીઃ સુભગો નામ પુષ્યન્ ॥ ૫.૦૩૭.૦૪
પુષ્યાત્ક્ષેમે અભિ યોગે ભવાત્યુભે વૃતૌ સંયતી સં જયાતિ ।
પ્રિયઃ સૂર્યે પ્રિયો અગ્ના ભવાતિ ય ઇન્દ્રાય સુતસોમો દદાશત્ ॥ ૫.૦૩૭.૦૫

ઉરોષ્ટ ઇન્દ્ર રાધસો વિભ્વી રાતિઃ શતક્રતો ।
અધા નો વિશ્વચર્ષણે દ્યુમ્ના સુક્ષત્ર મંહય ॥ ૫.૦૩૮.૦૧
યદીમિન્દ્ર શ્રવાય્યમિષં શવિષ્ઠ દધિષે ।
પપ્રથે દીર્ઘશ્રુત્તમં હિરણ્યવર્ણ દુષ્ટરમ્ ॥ ૫.૦૩૮.૦૨
શુષ્માસો યે તે અદ્રિવો મેહના કેતસાપઃ ।
ઉભા દેવાવભિષ્ટયે દિવશ્ચ ગ્મશ્ચ રાજથઃ ॥ ૫.૦૩૮.૦૩
ઉતો નો અસ્ય કસ્ય ચિદ્દક્ષસ્ય તવ વૃત્રહન્ ।
અસ્મભ્યં નૃમ્ણમા ભરાસ્મભ્યં નૃમણસ્યસે ॥ ૫.૦૩૮.૦૪
નૂ ત આભિરભિષ્ટિભિસ્તવ શર્મઞ્છતક્રતો ।
ઇન્દ્ર સ્યામ સુગોપાઃ શૂર સ્યામ સુગોપાઃ ॥ ૫.૦૩૮.૦૫

યદિન્દ્ર ચિત્ર મેહનાસ્તિ ત્વાદાતમદ્રિવઃ ।

રાધસ્તન્નો વિદદ્વસ ઉભયાહસ્ત્યા ભર ॥ ૫.૦૩૯.૦૧
યન્મન્યસે વરેણ્યમિન્દ્ર દ્યુક્ષં તદા ભર ।
વિદ્યામ તસ્ય તે વયમકૂપારસ્ય દાવને ॥ ૫.૦૩૯.૦૨
યત્તે દિત્સુ પ્રરાધ્યં મનો અસ્તિ શ્રુતં બૃહત્ ।
તેન દૃળ્હા ચિદદ્રિવ આ વાજં દર્ષિ સાતયે ॥ ૫.૦૩૯.૦૩
મંહિષ્ઠં વો મઘોનાં રાજાનં ચર્ષણીનામ્ ।
ઇન્દ્રમુપ પ્રશસ્તયે પૂર્વીભિર્જુજુષે ગિરઃ ॥ ૫.૦૩૯.૦૪
અસ્મા ઇત્કાવ્યં વચ ઉક્થમિન્દ્રાય શંસ્યમ્ ।
તસ્મા ઉ બ્રહ્મવાહસે ગિરો વર્ધન્ત્યત્રયો ગિરઃ શુમ્ભન્ત્યત્રયઃ ॥ ૫.૦૩૯.૦૫

આ યાહ્યદ્રિભિઃ સુતં સોમં સોમપતે પિબ ।
વૃષન્નિન્દ્ર વૃષભિર્વૃત્રહન્તમ ॥ ૫.૦૪૦.૦૧
વૃષા ગ્રાવા વૃષા મદો વૃષા સોમો અયં સુતઃ ।
વૃષન્નિન્દ્ર વૃષભિર્વૃત્રહન્તમ ॥ ૫.૦૪૦.૦૨
વૃષા ત્વા વૃષણં હુવે વજ્રિઞ્ચિત્રાભિરૂતિભિઃ ।
વૃષન્નિન્દ્ર વૃષભિર્વૃત્રહન્તમ ॥ ૫.૦૪૦.૦૩
ઋજીષી વજ્રી વૃષભસ્તુરાષાટ્ છુષ્મી રાજા વૃત્રહા સોમપાવા ।
યુક્ત્વા હરિભ્યામુપ યાસદર્વાઙ્માધ્યંદિને સવને મત્સદિન્દ્રઃ ॥ ૫.૦૪૦.૦૪
યત્ત્વા સૂર્ય સ્વર્ભાનુસ્તમસાવિધ્યદાસુરઃ ।
અક્ષેત્રવિદ્યથા મુગ્ધો ભુવનાન્યદીધયુઃ ॥ ૫.૦૪૦.૦૫
સ્વર્ભાનોરધ યદિન્દ્ર માયા અવો દિવો વર્તમાના અવાહન્ ।
ગૂળ્હં સૂર્યં તમસાપવ્રતેન તુરીયેણ બ્રહ્મણાવિન્દદત્રિઃ ॥ ૫.૦૪૦.૦૬
મા મામિમં તવ સન્તમત્ર ઇરસ્યા દ્રુગ્ધો ભિયસા નિ ગારીત્ ।
ત્વં મિત્રો અસિ સત્યરાધાસ્તૌ મેહાવતં વરુણશ્ચ રાજા ॥ ૫.૦૪૦.૦૭
ગ્રાવ્ણો બ્રહ્મા યુયુજાનઃ સપર્યન્કીરિણા દેવાન્નમસોપશિક્ષન્ ।
અત્રિઃ સૂર્યસ્ય દિવિ ચક્ષુરાધાત્સ્વર્ભાનોરપ માયા અઘુક્ષત્ ॥ ૫.૦૪૦.૦૮
યં વૈ સૂર્યં સ્વર્ભાનુસ્તમસાવિધ્યદાસુરઃ ।
અત્રયસ્તમન્વવિન્દન્નહ્યન્યે અશક્નુવન્ ॥ ૫.૦૪૦.૦૯

કો નુ વાં  મિત્રાવરુણાવૃતાયન્દિવો વા  મહઃ પાર્થિવસ્ય વા  દે ।
ઋતસ્ય  વા  સદસિ  ત્રાસીથાં નો યજ્ઞાયતે વા  પશુષો ન વાજાન્ ॥ ૫.૦૪૧.૦૧

તે નો  મિત્રો વરુણો અર્યમાયુરિન્દ્ર  ઋભુક્ષા મરુતો  જુષન્ત ।
નમોભિર્વા  યે દધતે સુવૃક્તિં સ્તોમં  રુદ્રાય  મીળ્હુષે  સજોષાઃ  ॥ ૫.૦૪૧.૦૨

આ વાં  યેષ્ઠાશ્વિના હુવધ્યૈ  વાતસ્ય  પત્મન્રથ્યસ્ય પુષ્ટૌ ।
ઉત વા  દિવો અસુરાય  મન્મ  પ્રાન્ધાંસીવ  યજ્યવે ભરધ્વમ્ ॥ ૫.૦૪૧.૦૩

પ્ર સક્ષણો  દિવ્યઃ કણ્વહોતા ત્રિતો દિવઃ સજોષા  વાતો  અગ્નિઃ ।
પૂષા ભગઃ  પ્રભૃથે વિશ્વભોજા આજિં ન જગ્મુરાશ્વશ્વતમાઃ ॥ ૫.૦૪૧.૦૪

પ્ર વો  રયિં યુક્તાશ્વં  ભરધ્વં રાય એષેઽવસે દધીત  ધીઃ ।
સુશેવ  એવૈરૌશિજસ્ય  હોતા  યે વ  એવા  મરુતસ્તુરાણામ્ ॥ ૫.૦૪૧.૦૫

પ્ર વો  વાયું રથયુજં  કૃણુધ્વં  પ્ર દેવં વિપ્રં  પનિતારમર્કૈઃ ।
ઇષુધ્યવ  ઋતસાપઃ  પુરંધીર્વસ્વીર્નો  અત્ર  પત્નીરા ધિયે ધુઃ  ॥ ૫.૦૪૧.૦૬

ઉપ  વ  એષે  વન્દ્યેભિઃ શૂષૈઃ પ્ર યહ્વી દિવશ્ચિતયદ્ભિરર્કૈઃ ।
ઉષાસાનક્તા  વિદુષીવ  વિશ્વમા હા  વહતો  મર્ત્યાય યજ્ઞમ્ ॥ ૫.૦૪૧.૦૭

અભિ વો  અર્ચે પોષ્યાવતો  નૄન્વાસ્તોષ્પતિં  ત્વષ્ટારં  રરાણઃ ।
ધન્યા  સજોષા  ધિષણા  નમોભિર્વનસ્પતીઁરોષધી રાય એષે  ॥ ૫.૦૪૧.૦૮

તુજે નસ્તને  પર્વતાઃ સન્તુ  સ્વૈતવો  યે વસવો  ન વીરાઃ ।
પનિત આપ્ત્યો યજતઃ સદા  નો  વર્ધાન્નઃ  શંસં  નર્યો  અભિષ્ટૌ  ॥ ૫.૦૪૧.૦૯

વૃષ્ણો  અસ્તોષિ ભૂમ્યસ્ય  ગર્ભં  ત્રિતો નપાતમપાં સુવૃક્તિ ।
ગૃણીતે અગ્નિરેતરી  ન શૂષૈઃ શોચિષ્કેશો  નિ રિણાતિ  વના  ॥ ૫.૦૪૧.૧૦

કથા મહે રુદ્રિયાય બ્રવામ  કદ્રાયે ચિકિતુષે  ભગાય ।
આપ  ઓષધીરુત નોઽવન્તુ  દ્યૌર્વના  ગિરયો  વૃક્ષકેશાઃ ॥ ૫.૦૪૧.૧૧

શ઼ૃણોતુ  ન ઊર્જાં પતિર્ગિરઃ  સ નભસ્તરીયાઁ ઇષિરઃ પરિજ્મા ।
શ઼ૃણ્વન્ત્વાપઃ  પુરો  ન શુભ્રાઃ પરિ  સ્રુચો  બબૃહાણસ્યાદ્રેઃ  ॥ ૫.૦૪૧.૧૨

વિદા ચિન્નુ મહાન્તો  યે વ  એવા  બ્રવામ દસ્મા  વાર્યં  દધાનાઃ ।
વયશ્ચન સુભ્વ૧  આવ  યન્તિ ક્ષુભા મર્તમનુયતં વધસ્નૈઃ ॥ ૫.૦૪૧.૧૩

આ દૈવ્યાનિ  પાર્થિવાનિ  જન્માપશ્ચાચ્છા  સુમખાય વોચમ્ ।

વર્ધન્તાં દ્યાવો ગિરશ્ચન્દ્રાગ્રા ઉદા વર્ધન્તામભિષાતા અર્ણાઃ ॥ ૫.૦૪૧.૧૪
પદેપદે મે જરિમા નિ ધાયિ વરૂત્રી વા શક્રા યા પાયુભિશ્ચ ।
સિષક્તુ માતા મહી રસા નઃ સ્મત્સૂરિભિરૃજુહસ્ત ઋજુવનિઃ ॥ ૫.૦૪૧.૧૫
કથા દાશેમ નમસા સુદાનૂનેવયા મરુતો અચ્છોક્તૌ પ્રશ્રવસો મરુતો અચ્છોક્તૌ ।
મા નોઽહિર્બુધ્ન્યો રિષે ધાદસ્માકં ભૂદુપમાતિવનિઃ ॥ ૫.૦૪૧.૧૬
ઇતિ ચિન્નુ પ્રજાયૈ પશુમત્યૈ દેવાસો વનતે મર્ત્યો વ આ દેવાસો વનતે મર્ત્યો વઃ ।
અત્રા શિવાં તન્વો ધાસિમસ્યા જરાં ચિન્મે નિરૃતિર્જગ્રસીત ॥ ૫.૦૪૧.૧૭
તાં વો દેવાઃ સુમતિમૂર્જયન્તીમિષમશ્યામ વસવઃ શસા ગોઃ ।
સા નઃ સુદાનુર્મૃળયન્તી દેવી પ્રતિ દ્રવન્તી સુવિતાય ગમ્યાઃ ॥ ૫.૦૪૧.૧૮
અભિ ન ઇળા યૂથસ્ય માતા સ્મન્નદીભિરુર્વશી વા ગૃણાતુ ।
ઉર્વશી વા બૃહદ્દિવા ગૃણાનાભ્યૂર્ણ્વાના પ્રભૃથસ્યાયોઃ ॥ ૫.૦૪૧.૧૯
સિષક્તુ ન ઊર્જવ્યસ્ય પુષ્ટેઃ ॥ ૫.૦૪૧.૨૦
પ્ર શંતમા વરુણં દીધિતી ગીર્મિત્રં ભગમદિતિં નૂનમશ્યાઃ ।
પૃષદ્યોનિઃ પઞ્ચહોતા શ‌ૃણોત્વતૂર્તપન્થા અસુરો મયોભુઃ ॥ ૫.૦૪૨.૦૧
પ્રતિ મે સ્તોમમદિતિર્જગૃભ્યાત્સૂનું ન માતા હૃદ્યં સુશેવમ્ ।
બ્રહ્મ પ્રિયં દેવહિતં યદસ્ત્યહં મિત્રે વરુણે યન્મયોભુ ॥ ૫.૦૪૨.૦૨
ઉદીરય કવિતમં કવીનામુનત્તૈનમભિ મધ્વા ઘૃતેન ।
સ નો વસૂનિ પ્રયતા હિતાનિ ચન્દ્રાણિ દેવઃ સવિતા સુવાતિ ॥ ૫.૦૪૨.૦૩
સમિન્દ્ર ણો મનસા નેષિ ગોભિઃ સં સૂરિભિર્હરિવઃ સં સ્વસ્તિ ।
સં બ્રહ્મણા દેવહિતં યદસ્તિ સં દેવાનાં સુમત્યા યજ્ઞિયાનામ્ ॥ ૫.૦૪૨.૦૪
દેવો ભગઃ સવિતા રાયો અંશ ઇન્દ્રો વૃત્રસ્ય સંજિતો ધનાનામ્ ।
ઋભુક્ષા વાજ ઉત વા પુરંધિરવન્તુ નો અમૃતાસસ્તુરાસઃ ॥ ૫.૦૪૨.૦૫
મરુત્વતો અપ્રતીતસ્ય જિષ્ણોરજૂર્યતઃ પ્ર બ્રવામા કૃતાનિ ।
ન તે પૂર્વે મઘવન્નાપરાસો ન વીર્યં૧ નૂતનઃ કશ્ચનાપ ॥ ૫.૦૪૨.૦૬
ઉપ સ્તુહિ પ્રથમં રત્નધેયં બૃહસ્પતિં સનિતારં ધનાનામ્ ।
યઃ શંસતે સ્તુવતે શમ્ભવિષ્ઠઃ પુરૂવસુરાગમજ્જોહુવાનમ્ ॥ ૫.૦૪૨.૦૭
તવોતિભિઃ સચમાના અરિષ્ટા બૃહસ્પતે મઘવાનઃ સુવીરાઃ ।

યે અશ્વદા ઉત વા સન્તિ ગોદા યે વસ્ત્રદાઃ સુભગાસ્તેષુ રાયઃ ॥ ૫.૦૪૨.૦૮
વિસર્માણં કૃણુહિ વિત્તમેષાં યે ભુઞ્જતે અપૃણન્તો ન ઉક્થૈઃ ।
અપવ્રતાન્પ્રસવે વાવૃધાનાન્બ્રહ્મદ્વિષઃ સૂર્યાદ્યાવયસ્વ ॥ ૫.૦૪૨.૦૯
ય ઓહતે રક્ષસો દેવવીતાવચક્રેભિસ્તં મરુતો નિ યાત ।
યો વઃ શમીં શશમાનસ્ય નિન્દાત્તુચ્છ્યાન્કામાન્કરતે સિષ્વિદાનઃ ॥ ૫.૦૪૨.૧૦
તમુ ષ્ટુહિ યઃ સ્વિષુઃ સુધન્વા યો વિશ્વસ્ય ક્ષયતિ ભેષજસ્ય ।
યક્ષ્વા મહે સૌમનસાય રુદ્રં નમોભિર્દેવમસુરં દુવસ્ય ॥ ૫.૦૪૨.૧૧
દમૂનસો અપસો યે સુહસ્તા વૃષ્ણઃ પત્નીર્નદ્યો વિભ્વતષ્ટાઃ ।
સરસ્વતી બૃહદ્દિવોત રાકા દશસ્યન્તીર્વરિવસ્યન્તુ શુભ્રાઃ ॥ ૫.૦૪૨.૧૨
પ્ર સૂ મહે સુશરણાય મેધાં ગિરં ભરે નવ્યસીં જાયમાનામ્ ।
ય આહના દુહિતુર્વક્ષણાસુ રૂપા મિનાનો અકૃણોદિદં નઃ ॥ ૫.૦૪૨.૧૩
પ્ર સુષ્ટુતિઃ સ્તનયન્તં રુવન્તમિળસ્પતિં જરિતર્નૂનમશ્યાઃ ।
યો અબ્દિમાઁ ઉદનિમાઁ ઇયર્તિ પ્ર વિદ્યુતા રોદસી ઉક્ષમાણઃ ॥ ૫.૦૪૨.૧૪
એષ સ્તોમો મારુતં શર્ધો અચ્છા રુદ્રસ્ય સૂનૂઁર્યુવન્યૂઁરુદશ્યાઃ ।
કામો રાયે હવતે મા સ્વસ્ત્યુપ સ્તુહિ પૃષદશ્વાઁ અયાસઃ ॥ ૫.૦૪૨.૧૫
પ્રૈષ સ્તોમઃ પૃથિવીમન્તરિક્ષં વનસ્પતીઁરોષધી રાયે અશ્યાઃ ।
દેવોદેવઃ સુહવો ભૂતુ મહ્યં મા નો માતા પૃથિવી દુર્મતૌ ધાત્ ॥ ૫.૦૪૨.૧૬
ઉરૌ દેવા અનિબાધે સ્યામ ॥ ૫.૦૪૨.૧૭
સમશ્વિનોરવસા નૂતનેન મયોભુવા સુપ્રણીતી ગમેમ ।
આ નો રયિં વહતમોત વીરાના વિશ્વાન્યમૃતા સૌભગાનિ ॥ ૫.૦૪૨.૧૮

આ ધેનવઃ પયસા તૂર્ણ્યર્થા અમર્ધન્તીરુપ નો યન્તુ મધ્વા ।
મહો રાયે બૃહતીઃ સપ્ત વિપ્રો મયોભુવો જરિતા જોહવીતિ ॥ ૫.૦૪૩.૦૧
આ સુષ્ટુતી નમસા વર્તયધ્યૈ દ્યાવા વાજાય પૃથિવી અમૃધ્રે ।
પિતા માતા મધુવચાઃ સુહસ્તા ભરેભરે નો યશસાવવિષ્ટામ્ ॥ ૫.૦૪૩.૦૨
અધ્વર્યવશ્ચકૃવાંસો મધૂનિ પ્ર વાયવે ભરત ચારુ શુક્રમ્ ।
હોતેવ નઃ પ્રથમઃ પાહ્યસ્ય દેવ મધ્વો રરિમા તે મદાય ॥ ૫.૦૪૩.૦૩
દશ ક્ષિપો યુઞ્જતે બાહૂ અદ્રિં સોમસ્ય યા શમિતારા સુહસ્તા ।

મધ્વો રસં સુગભસ્તિર્ગિરિષ્ઠાં ચનિશ્ચદદ્દુહે શુક્રમંશુઃ ॥ ૫.૦૪૩.૦૪
અસાવિ તે જુજુષાણાય સોમઃ ક્રત્વે દક્ષાય બૃહતે મદાય ।
હરી રથે સુધુરા યોગે અર્વાગિન્દ્ર પ્રિયા કૃણુહિ હૂયમાનઃ ॥ ૫.૦૪૩.૦૫
આ નો મહીમરમતિં સજોષા ગ્નાં દેવીં નમસા રાતહવ્યામ્ ।
મધોર્મદાય બૃહતીમૃતજ્ઞામાગ્ને વહ પથિભિર્દેવયાનૈઃ ॥ ૫.૦૪૩.૦૬
અઞ્જન્તિ યં પ્રથયન્તો ન વિપ્રા વપાવન્તં નાગ્નિના તપન્તઃ ।
પિતુર્ન પુત્ર ઉપસિ પ્રેષ્ઠ આ ઘર્મો અગ્નિમૃતયન્નસાદિ ॥ ૫.૦૪૩.૦૭
અચ્છા મહી બૃહતી શંતમા ગીર્દૂતો ન ગન્ત્વશ્વિના હુવધ્યૈ ।
મયોભુવા સરથા યાતમર્વાગ્ગન્તં નિધિં ધુરમાણિર્ન નાભિમ્ ॥ ૫.૦૪૩.૦૮
પ્ર તવ્યસો નમઉક્તિં તુરસ્યાહં પૂષ્ણ ઉત વાયોરદિક્ષિ ।
યા રાધસા ચોદિતારા મતીનાં યા વાજસ્ય દ્રવિણોદા ઉત ત્મન્ ॥ ૫.૦૪૩.૦૯
આ નામભિર્મરુતો વક્ષિ વિશ્વાના રૂપેભિર્જાતવેદો હુવાનઃ ।
યજ્ઞં ગિરો જરિતુઃ સુષ્ટુતિં ચ વિશ્વે ગન્ત મરુતો વિશ્વ ઊતી ॥ ૫.૦૪૩.૧૦
આ નો દિવો બૃહતઃ પર્વતાદા સરસ્વતી યજતા ગન્તુ યજ્ઞમ્ ।
હવં દેવી જુજુષાણા ઘૃતાચી શગ્માં નો વાચમુશતી શૃણોતુ ॥ ૫.૦૪૩.૧૧
આ વેધસં નીલપૃષ્ઠં બૃહન્તં બૃહસ્પતિં સદને સાદયધ્વમ્ ।
સાદદ્યોનિં દમ આ દીદિવાંસં હિરણ્યવર્ણમરુષં સપેમ ॥ ૫.૦૪૩.૧૨
આ ધર્ણસિર્બૃહદ્દિવો રરાણો વિશ્વેભિર્ગન્ત્વોમભિર્હુવાનઃ ।
ગ્ના વસાન ઓષધીરમૃધ્રસ્ત્રિધાતુશૃઙ્ગો વૃષભો વયોધાઃ ॥ ૫.૦૪૩.૧૩
માતુષ્પદે પરમે શુક્ર આયોર્વિપન્યવો રાસ્પિરાસો અગ્મન્ ।
સુશેવ્યં નમસા રાતહવ્યાઃ શિશું મૃજન્ત્યાયવો ન વાસે ॥ ૫.૦૪૩.૧૪
બૃહદ્વયો બૃહતે તુભ્યમગ્ને ધિયાજુરો મિથુનાસઃ સચન્ત ।
દેવોદેવઃ સુહવો ભૂતુ મહ્યં મા નો માતા પૃથિવી દુર્મતૌ ધાત્ ॥ ૫.૦૪૩.૧૫
ઉરૌ દેવા અનિબાધે સ્યામ ॥ ૫.૦૪૩.૧૬
સમશ્વિનોરવસા નૂતનેન મયોભુવા સુપ્રણીતી ગમેમ ।
આ નો રયિં વહતમોત વીરાના વિશ્વાન્યમૃતા સૌભગાનિ ॥ ૫.૦૪૩.૧૭
તં પ્રત્નથા પૂર્વથા વિશ્વથેમથા જ્યેષ્ઠતાતિં બર્હિષદં સ્વર્વિદમ્ ।

પ્રતીચીનં વૃજનં  દોહસે ગિરાશું જયન્તમનુ  યાસુ  વર્ધસે ॥ ૫.૦૪૪.૦૧
શ્રિયે સુદૃશીરુપરસ્ય  યાઃ સ્વર્વિરોચમાનઃ કકુભામચોદતે  ।
સુગોપા અસિ  ન દભાય સુક્રતો પરો માયાભિરૃત આસ  નામ  તે ॥ ૫.૦૪૪.૦૨
અત્યં  હવિઃ સચતે  સચ્ચ  ધાતુ  ચારિષ્ટગાતુઃ  સ હોતા  સહોભરિઃ  ।
પ્રસર્સ્રાણો  અનુ  બર્હિર્વૃષા  શિશુર્મધ્યે  યુવાજરો  વિસ્રુહા  હિતઃ ॥ ૫.૦૪૪.૦૩
પ્ર વ  એતે સુયુજો  યામન્નિષ્ટયે  નીચીરમુષ્મૈ  યમ્ય  ઋતાવૃધઃ  ।
સુયન્તુભિઃ સર્વશાસૈરભીશુભિઃ  ક્રિવિર્નામાનિ પ્રવણે મુષાયતિ ॥ ૫.૦૪૪.૦૪
સંજર્ભુરાણસ્તરુભિઃ સુતેગૃભં  વયાકિનં  ચિત્તગર્ભાસુ સુસ્વરુઃ  ।
ધારવાકેષ્વૃજુગાથ શોભસે  વર્ધસ્વ  પત્નીરભિ જીવો અધ્વરે ॥ ૫.૦૪૪.૦૫
યાદૃગેવ દદૃશે તાદૃગુચ્યતે  સં છાયયા  દધિરે સિધ્રયાપ્સ્વા ।
મહીમસ્મભ્યમુરુષામુરુ જયો  બૃહત્સુવીરમનપચ્યુતં  સહઃ  ॥ ૫.૦૪૪.૦૬
વેત્યગ્રુર્જનિવાન્વા અતિ  સ્પૃધઃ  સમર્યતા મનસા  સૂર્યઃ  કવિઃ ।
ઘ્રંસં રક્ષન્તં  પરિ  વિશ્વતો  ગયમસ્માકં  શર્મ  વનવત્સ્વાવસુઃ ॥ ૫.૦૪૪.૦૭
જ્યાયાંસમસ્ય યતુનસ્ય કેતુન  ઋષિસ્વરં ચરતિ  યાસુ  નામ  તે ।
યાદૃશ્મિન્ધાયિ  તમપસ્યયા  વિદદ્ય ઉ  સ્વયં વહતે  સો અરં  કરત્ ॥ ૫.૦૪૪.૦૮
સમુદ્રમાસામવ  તસ્થે અગ્રિમા ન રિષ્યતિ  સવનં  યસ્મિન્નાયતા ।
અત્રા  ન હાર્દિ  ક્રવણસ્ય  રેજતે  યત્રા  મતિર્વિદ્યતે  પૂતબન્ધની ॥ ૫.૦૪૪.૦૯
સ હિ ક્ષત્રસ્ય  મનસસ્ય  ચિત્તિભિરેવાવદસ્ય  યજતસ્ય  સધ્રેઃ  ।
અવત્સારસ્ય  સ્પૃણવામ  રણ્વભિઃ  શવિષ્ઠં  વાજં  વિદુષા  ચિદર્ધ્યમ્ ॥ ૫.૦૪૪.૧૦
શ્યેન આસામદિતિઃ કક્ષ્યોઉ  મદો  વિશ્વવારસ્ય યજતસ્ય  માયિનઃ  ।
સમન્યમન્યમર્થયન્ત્યેતવે વિદુર્વિષાણં  પરિપાનમન્તિ  તે ॥ ૫.૦૪૪.૧૧
સદાપૃણો યજતો વિ દ્વિષો  વધીદ્બાહુવૃક્તઃ શ્રુતવિત્તર્યો  વઃ  સચા  ।
ઉભા સ વરા  પ્રત્યેતિ  ભાતિ  ચ  યદીં  ગણં ભજતે સુપ્રયાવભિઃ ॥ ૫.૦૪૪.૧૨
સુતમ્ભરો યજમાનસ્ય  સત્પતિર્વિશ્વાસામૂધઃ  સ ધિયામુદઞ્ચનઃ ।
ભરદ્ધેનૂ રસવચ્છિશ્રિયે  પયોઽનુબ્રુવાણો અધ્યેતિ  ન સ્વપન્ ॥ ૫.૦૪૪.૧૩
યો જાગાર  તમૃચઃ  કામયન્તે  યો જાગાર  તમુ  સામાનિ યન્તિ ।
યો જાગાર  તમયં સોમ  આહ  તવાહમસ્મિ સખ્યે ન્યોકાઃ ॥ ૫.૦૪૪.૧૪

અગ્નિર્જાગાર તમૃચઃ કામયન્તેઽગ્નિર્જાગાર તમુ સામાનિ યન્તિ ।
અગ્નિર્જાગાર તમયં સોમ આહ તવાહમસ્મિ સખ્યે ન્યોકાઃ ॥ ૫.૦૪૪.૧૫

વિદા દિવો વિષ્યન્નદ્રિમુક્થૈરાયત્યા ઉષસો અર્ચિનો ગુઃ ।
અપાવૃત વ્રજિનીરુત્સ્વર્ગાદ્વિ દુરો માનુષીર્દેવ આવઃ ॥ ૫.૦૪૫.૦૧

વિ સૂર્યો અમતિં ન શ્રિયં સાદોર્વાદ્ગવાં માતા જાનતી ગાત્ ।
ધન્વર્ણસો નદ્ય૧ઃ ખાદોઅર્ણાઃ સ્થૂણેવ સુમિતા દૃંહત દ્યૌઃ ॥ ૫.૦૪૫.૦૨

અસ્મા ઉક્થાય પર્વતસ્ય ગર્ભો મહીનાં જનુષે પૂર્વ્યાય ।
વિ પર્વતો જિહીત સાધત દ્યૌરાવિવાસન્તો દસયન્ત ભૂમ ॥ ૫.૦૪૫.૦૩

સૂક્તેભિર્વો વચોભિર્દેવજુષ્ટૈરિન્દ્રા ન્વ૧ગ્ની અવસે હુવધ્યૈ ।
ઉક્થેભિર્હિ ષ્મા કવયઃ સુયજ્ઞા આવિવાસન્તો મરુતો યજન્તિ ॥ ૫.૦૪૫.૦૪

એતો ન્વ૧દ્ય સુધ્યો૩ ભવામ પ્ર દુચ્છુના મિનવામા વરીયઃ ।
આરે દ્વેષાંસિ સનુતર્દધામાયામ પ્રાઞ્ચો યજમાનમચ્છ ॥ ૫.૦૪૫.૦૫

એતા ધિયં કૃણવામા સખાયોઽપ યા માતાઁ ઋણુત વ્રજં ગોઃ ।
યયા મનુર્વિશિશિપ્રં જિગાય યયા વણિગ્વઙ્કુરાપા પુરીષમ્ ॥ ૫.૦૪૫.૦૬

અનૂનોદત્ર હસ્તયતો અદ્રિરાર્ચન્યેન દશ માસો નવગ્વાઃ ।
ઋતં યતી સરમા ગા અવિન્દદ્વિશ્વાનિ સત્યાઙ્ગિરાશ્ચકાર ॥ ૫.૦૪૫.૦૭

વિશ્વે અસ્યા વ્યુષિ માહિનાયાઃ સં યદ્ગોભિરઙ્ગિરસો નવન્ત ।
ઉત્સ આસાં પરમે સધસ્થ ઋતસ્ય પથા સરમા વિદદ્ગાઃ ॥ ૫.૦૪૫.૦૮

આ સૂર્યો યાતુ સપ્તાશ્વઃ ક્ષેત્રં યદસ્યોર્વિયા દીર્ઘયાથે ।
રઘુઃ શ્યેનઃ પતયદન્ધો અચ્છા યુવા કવિર્દીદયદ્ગોષુ ગચ્છન્ ॥ ૫.૦૪૫.૦૯

આ સૂર્યો અરુહચ્છુક્રમર્ણોઽયુક્ત યદ્ધરિતો વીતપૃષ્ઠાઃ ।
ઉદ્ના ન નાવમનયન્ત ધીરા આશ◌ૃણ્વતીરાપો અર્વાગતિષ્ઠન્ ॥ ૫.૦૪૫.૧૦

ધિયં વો અપ્સુ દધિષે સ્વર્ષાં યયાતરન્દશ માસો નવગ્વાઃ ।
અયા ધિયા સ્યામ દેવગોપા અયા ધિયા તુતુર્યામાત્યંહઃ ॥ ૫.૦૪૫.૧૧

હયો ન વિદ્વાઁ અયુજિ સ્વયં ધુરિ તાં વહામિ પ્રતરણીમવસ્યુવમ્ ।
નાસ્યા વશ્મિ વિમુચં નાવૃતં પુનર્વિદ્વાન્પથઃ પુરએત ઋજુ નેષતિ ॥ ૫.૦૪૬.૦૧

અગ્ન ઇન્દ્ર વરુણ મિત્ર દેવાઃ શર્ધઃ પ્ર યન્ત મારુતોત વિષ્ણો ।

ઉભા નાસત્યા રુદ્રો અધ ગ્નાઃ પૂષા ભગઃ સરસ્વતી જુષન્ત ॥ ૫.૦૪૬.૦૨
ઇન્દ્રાગ્ની મિત્રાવરુણાદિતિં સ્વઃ પૃથિવીં દ્યાં મરુતઃ પર્વતાઁ અપઃ ।
હુવે વિષ્ણું પૂષણં બ્રહ્મણસ્પતિં ભગં નુ શંસં સવિતારમૂતયે ॥ ૫.૦૪૬.૦૩
ઉત નો વિષ્ણુરુત વાતો અસ્રિધો દ્રવિણોદા ઉત સોમો મયસ્કરત્ ।
ઉત ઋભવ ઉત રાયે નો અશ્વિનોત ત્વષ્ટોત વિભ્વાનુ મંસતે ॥ ૫.૦૪૬.૦૪
ઉત ત્યન્નો મારુતં શર્ધ આ ગમદ્દિવિક્ષયં યજતં બર્હિરાસદે ।
બૃહસ્પતિઃ શર્મ પૂષોત નો યમદ્વરૂથ્યં૧ વરુણો મિત્રો અર્યમા ॥ ૫.૦૪૬.૦૫
ઉત ત્યે નઃ પર્વતાસઃ સુશસ્તયઃ સુદીતયો નદ્ય૧સ્ત્રામણે ભુવન્ ।
ભગો વિભક્તા શવસાવસા ગમદુરુવ્યચા અદિતિઃ શ્રોતુ મે હવમ્ ॥ ૫.૦૪૬.૦૬
દેવાનાં પત્નીરુશતીરવન્તુ નઃ પ્રાવન્તુ નસ્તુજયે વાજસાતયે ।
યાઃ પાર્થિવાસો યા અપામપિ વ્રતે તા નો દેવીઃ સુહવાઃ શર્મ યચ્છત ॥ ૫.૦૪૬.૦૭
ઉત ગ્ના વ્યન્તુ દેવપત્નીરિન્દ્રાણ્ય૧ગ્નાય્યશ્વિની રાટ્ ।
આ રોદસી વરુણાની શ઼ૃણોતુ વ્યન્તુ દેવીર્ય ઋતુર્જનીનામ્ ॥ ૫.૦૪૬.૦૮

પ્રયુઞ્જતી દિવ એતિ બ્રુવાણા મહી માતા દુહિતુર્બોધયન્તી ।
આવિવાસન્તી યુવતિર્મનીષા પિતૃભ્ય આ સદને જોહુવાના ॥ ૫.૦૪૭.૦૧
અજિરાસસ્તદપ ઈયમાના આતસ્થિવાંસો અમૃતસ્ય નાભિમ્ ।
અનન્તાસ ઉરવો વિશ્વતઃ સીં પરિ દ્યાવાપૃથિવી યન્તિ પન્થાઃ ॥ ૫.૦૪૭.૦૨
ઉક્ષા સમુદ્રો અરુષઃ સુપર્ણઃ પૂર્વસ્ય યોનિં પિતુરા વિવેશ ।
મધ્યે દિવો નિહિતઃ પૃશ્નિરશ્મા વિ ચક્રમે રજસસ્પાત્યન્તૌ ॥ ૫.૦૪૭.૦૩
ચત્વાર ઈં બિભ્રતિ ક્ષેમયન્તો દશ ગર્ભં ચરસે ધાપયન્તે ।
ત્રિધાતવઃ પરમા અસ્ય ગાવો દિવશ્ચરન્તિ પરિ સદ્યો અન્તાન્ ॥ ૫.૦૪૭.૦૪
ઇદં વપુર્નિવચનં જનાસશ્ચરન્તિ યન્નદ્યસ્તસ્થુરાપઃ ।
દ્વે યદીં બિભૃતો માતુરન્યે ઇહેહ જાતે યમ્યા૩ સબન્ધૂ ॥ ૫.૦૪૭.૦૫
વિ તન્વતે ધિયો અસ્મા અપાંસિ વસ્ત્રા પુત્રાય માતરો વયન્તિ ।
ઉપપ્રક્ષે વૃષણો મોદમાના દિવસ્પથા વધ્વો યન્ત્યચ્છ ॥ ૫.૦૪૭.૦૬
તદસ્તુ મિત્રાવરુણા તદગ્ને શં યોરસ્મભ્યમિદમસ્તુ શસ્તમ્ ।
અશીમહિ ગાધમુત પ્રતિષ્ઠાં નમો દિવે બૃહતે સાદનાય ॥ ૫.૦૪૭.૦૭

કદુ પ્રિયાય ધામ્ને મનામહે સ્વક્ષત્રાય સ્વયશસે મહે વયમ્ ।
આમેન્યસ્ય રજસો યદભ્ર આઁ અપો વૃણાના વિતનોતિ માયિની ॥ ૫.૦૪૮.૦૧
તા અત્નત વયુનં વીરવક્ષણં સમાન્યા વૃતયા વિશ્વમા રજઃ ।
અપો અપાચીરપરા અપેજતે પ્ર પૂર્વાભિસ્તિરતે દેવયુર્જનઃ ॥ ૫.૦૪૮.૦૨
આ ગ્રાવભિરહન્યેભિરક્તુભિર્વરિષ્ઠં વજ્રમા જિઘર્તિ માયિનિ ।
શતં વા યસ્ય પ્રચરન્સ્વે દમે સંવર્તયન્તો વિ ચ વર્તયન્નહા ॥ ૫.૦૪૮.૦૩
તામસ્ય રીતિં પરશોરિવ પ્રત્યનીકમખ્યં ભુજે અસ્ય વર્પસઃ ।
સચા યદિ પિતુમન્તમિવ ક્ષયં રત્નં દધાતિ ભરહૂતયે વિશે ॥ ૫.૦૪૮.૦૪
સ જિહ્વયા ચતુરનીક ઋઞ્જતે ચારુ વસાનો વરુણો યતન્નરિમ્ ।
ન તસ્ય વિદ્મ પુરુષત્વતા વયં યતો ભગઃ સવિતા દાતિ વાર્યમ્ ॥ ૫.૦૪૮.૦૫

દેવં વો અદ્ય સવિતારમેષે ભગં ચ રત્નં વિભજન્તમાયોઃ ।
આ વાં નરા પુરુભુજા વવૃત્યાં દિવેદિવે ચિદશ્વિના સખીયન્ ॥ ૫.૦૪૯.૦૧
પ્રતિ પ્રયાણમસુરસ્ય વિદ્વાન્સૂક્તૈર્દેવં સવિતારં દુવસ્ય ।
ઉપ બ્રુવીત નમસા વિજાનઞ્જ્યેષ્ઠં ચ રત્નં વિભજન્તમાયોઃ ॥ ૫.૦૪૯.૦૨
અદત્રયા દયતે વાર્યાણિ પૂષા ભગો અદિતિર્વસ્ત ઉસ્રઃ ।
ઇન્દ્રો વિષ્ણુર્વરુણો મિત્રો અગ્નિરહાનિ ભદ્રા જનયન્ત દસ્માઃ ॥ ૫.૦૪૯.૦૩
તન્નો અનર્વા સવિતા વરૂથં તત્સિન્ધવ ઇષયન્તો અનુ ગ્મન્ ।
ઉપ યદ્વોચે અધ્વરસ્ય હોતા રાયઃ સ્યામ પતયો વાજરત્નાઃ ॥ ૫.૦૪૯.૦૪
પ્ર યે વસુભ્ય ઈવદા નમો દુર્યે મિત્રે વરુણે સૂક્તવાચઃ ।
અવૈત્વભ્વં કૃણુતા વરીયો દિવસ્પૃથિવ્યોરવસા મદેમ ॥ ૫.૦૪૯.૦૫

વિશ્વો દેવસ્ય નેતુર્મર્તો વુરીત સખ્યમ્ ।
વિશ્વો રાય ઇષુધ્યતિ દ્યુમ્નં વૃણીત પુષ્યસે ॥ ૫.૦૫૦.૦૧
તે તે દેવ નેતર્યે ચેમાઁ અનુશસે ।
તે રાયા તે હ્યાઉપૃચે સચેમહિ સચથ્યૈઃ ॥ ૫.૦૫૦.૦૨
અતો ન આ નૄનતિથીનતઃ પત્નીર્દશસ્યત ।
આરે વિશ્વં પથેષ્ઠાં દ્વિષો યુયોતુ યૂયુવિઃ ॥ ૫.૦૫૦.૦૩
યત્ર વહ્નિરભિહિતો દુદ્રવદ્દ્રોણ્યઃ પશુઃ ।

નૃમણા વીરપસ્ત્યોઽર્ણા ધીરેવ સનિતા ॥ ૫.૦૫૦.૦૪
એષ તે દેવ નેતા રથસ્પતિઃ શં રયિઃ ।
શં રાયે શં સ્વસ્તય ઇષઃસ્તુતો મનામહે દેવસ્તુતો મનામહે ॥ ૫.૦૫૦.૦૫
અગ્ને સુતસ્ય પીતયે વિશ્વૈરૂમેભિરા ગહિ ।
દેવેભિર્હવ્યદાતયે ॥ ૫.૦૫૧.૦૧
ઋતધીતય આ ગત સત્યધર્માણો અધ્વરમ્ ।
અગ્નેઃ પિબત જિહ્વયા ॥ ૫.૦૫૧.૦૨
વિપ્રેભિર્વિપ્ર સન્ત્ય પ્રાતર્યાવભિરા ગહિ ।
દેવેભિઃ સોમપીતયે ॥ ૫.૦૫૧.૦૩
અયં સોમશ્ચમૂ સુતોઽમત્રે પરિ ષિચ્યતે ।
પ્રિય ઇન્દ્રાય વાયવે ॥ ૫.૦૫૧.૦૪
વાયવા યાહિ વીતયે જુષાણો હવ્યદાતયે ।
પિબા સુતસ્યાન્ધસો અભિ પ્રયઃ ॥ ૫.૦૫૧.૦૫
ઇન્દ્રશ્ચ વાયવેષાં સુતાનાં પીતિમર્હથઃ ।
તાઞ્જુષેથામરેપસાવભિ પ્રયઃ ॥ ૫.૦૫૧.૦૬
સુતા ઇન્દ્રાય વાયવે સોમાસો દધ્યાશિરઃ ।
નિમ્નં ન યન્તિ સિન્ધવોઽભિ પ્રયઃ ॥ ૫.૦૫૧.૦૭
સજૂર્વિશ્વેભિર્દેવેભિરશ્વિભ્યામુષસા સજૂઃ ।
આ યાહ્યગ્ને અત્રિવત્સુતે રણ ॥ ૫.૦૫૧.૦૮
સજૂર્મિત્રાવરુણાભ્યાં સજૂઃ સોમેન વિષ્ણુના ।
આ યાહ્યગ્ને અત્રિવત્સુતે રણ ॥ ૫.૦૫૧.૦૯
સજૂરાદિત્યૈર્વસુભિઃ સજૂરિન્દ્રેણ વાયુના ।
આ યાહ્યગ્ને અત્રિવત્સુતે રણ ॥ ૫.૦૫૧.૧૦
સ્વસ્તિ નો મિમીતામશ્વિના ભગઃ સ્વસ્તિ દેવ્યદિતિરનર્વણઃ ।
સ્વસ્તિ પૂષા અસુરો દધાતુ નઃ સ્વસ્તિ દ્યાવાપૃથિવી સુચેતુના ॥ ૫.૦૫૧.૧૧
સ્વસ્તયે વાયુમુપ બ્રવામહૈ સોમં સ્વસ્તિ ભુવનસ્ય યસ્પતિઃ ।
બૃહસ્પતિં સર્વગણં સ્વસ્તયે સ્વસ્તય આદિત્યાસો ભવન્તુ નઃ ॥ ૫.૦૫૧.૧૨

વિશ્વે દેવા નો અદ્યા સ્વસ્તયે વૈશ્વાનરો વસુરગ્નિઃ સ્વસ્તયે ।
દેવા અવન્ત્વૃભવઃ સ્વસ્તયે સ્વસ્તિ નો રુદ્રઃ પાત્વંહસઃ ॥ ૫.૦૫૧.૧૩
સ્વસ્તિ મિત્રાવરુણા સ્વસ્તિ પથ્યે રેવતિ ।
સ્વસ્તિ ન ઇન્દ્રશ્ચાગ્નિશ્ચ સ્વસ્તિ નો અદિતે કૃધિ ॥ ૫.૦૫૧.૧૪
સ્વસ્તિ પન્થામનુ ચરેમ સૂર્યાચન્દ્રમસાવિવ ।
પુનર્દદતાઘ્નતા જાનતા સં ગમેમહિ ॥ ૫.૦૫૧.૧૫

પ્ર શ્યાવાશ્વ ધૃષ્ણુયાર્ચા મરુદ્ભિરૃક્વભિઃ ।
યે અદ્રોઘમનુષ્વધં શ્રવો મદન્તિ યજ્ઞિયાઃ ॥ ૫.૦૫૨.૦૧
તે હિ સ્થિરસ્ય શવસઃ સખાયઃ સન્તિ ધૃષ્ણુયા ।
તે યામન્ના ધૃષદ્વિનસ્ત્મના પાન્તિ શશ્વતઃ ॥ ૫.૦૫૨.૦૨
તે સ્યન્દ્રાસો નોક્ષણોઽતિ ષ્કન્દન્તિ શર્વરીઃ ।
મરુતામધા મહો દિવિ ક્ષમા ચ મન્મહે ॥ ૫.૦૫૨.૦૩
મરુત્સુ વો દધીમહિ સ્તોમં યજ્ઞં ચ ધૃષ્ણુયા ।
વિશ્વે યે માનુષા યુગા પાન્તિ મર્ત્યં રિષઃ ॥ ૫.૦૫૨.૦૪
અર્હન્તો યે સુદાનવો નરો અસામિશવસઃ ।
પ્ર યજ્ઞં યજ્ઞિયેભ્યો દિવો અર્ચા મરુદ્ભ્યઃ ॥ ૫.૦૫૨.૦૫
આ રુક્મૈરા યુધા નર ઋષ્વા ઋષ્ટીરસૃક્ષત ।
અન્વેના◌ઁ અહ વિદ્યુતો મરુતો જજ્ઝતીરિવ ભાનુરર્ત ત્મના દિવઃ ॥ ૫.૦૫૨.૦૬
યે વાવૃધન્ત પાર્થિવા ય ઉરાવન્તરિક્ષ આ ।
વૃજને વા નદીનાં સધસ્થે વા મહો દિવઃ ॥ ૫.૦૫૨.૦૭
શર્ધો મારુતમુચ્છંસ સત્યશવસમૃભ્વસમ્ ।
ઉત સ્મ તે શુભે નરઃ પ્ર સ્યન્દ્રા યુજત ત્મના ॥ ૫.૦૫૨.૦૮
ઉત સ્મ તે પરુષ્ણ્યામૂર્ણા વસત શુન્ધ્યવઃ ।
ઉત પવ્યા રથાનામદ્રિં ભિન્દન્ત્યોજસા ॥ ૫.૦૫૨.૦૯
આપથયો વિપથયોઽન્તસ્પથા અનુપથાઃ ।
એતેભિર્મહ્યં નામભિર્યજ્ઞં વિષ્ટાર ઓહતે ॥ ૫.૦૫૨.૧૦
અધા નરો ન્યોહતેઽધા નિયુત ઓહતે ।

અધા પારાવતા ઇતિ ચિત્રા રૂપાણિ દર્શ્યા ॥ ૫.૦૫૨.૧૧

છન્દઃસ્તુભઃ કુભન્યવ ઉત્સમા કીરિણો નૃતુઃ ।

તે મે કે ચિન્ન તાયવ ઊમા આસન્દૃશિ ત્વિષે ॥ ૫.૦૫૨.૧૨

ય ઋષ્વા ઋષ્ટિવિદ્યુતઃ કવયઃ સન્તિ વેધસઃ ।

તમૃષે મારુતં ગણં નમસ્યા રમયા ગિરા ॥ ૫.૦૫૨.૧૩

અચ્છ ઋષે મારુતં ગણં દાના મિત્રં ન યોષણા ।

દિવો વા ધૃષ્ણવ ઓજસા સ્તુતા ધીભિરિષણ્યત ॥ ૫.૦૫૨.૧૪

નૂ મન્વાન એષાં દેવાઁ અચ્છા ન વક્ષણા ।

દાના સચેત સૂરિભિર્યામશ્રુતેભિરઞ્જિભિઃ ॥ ૫.૦૫૨.૧૫

પ્ર યે મે બન્ધ્વેષે ગાં વોચન્ત સૂરયઃ પૃશ્નિં વોચન્ત માતરમ્ ।

અધા પિતરમિષ્મિણં રુદ્રં વોચન્ત શિક્વસઃ ॥ ૫.૦૫૨.૧૬

સપ્ત મે સપ્ત શાકિન એકમેકા શતા દદુઃ ।

યમુનાયામધિ શ્રુતમુદ્રાધો ગવ્યં મૃજે નિ રાધો અશ્વ્યં મૃજે ॥ ૫.૦૫૨.૧૭

કો વેદ જાનમેષાં કો વા પુરા સુમ્નેષ્વાસ મરુતામ્ ।

યદ્યુયુજ્રે કિલાસ્યઃ ॥ ૫.૦૫૩.૦૧

ઐતાન્રથેષુ તસ્થુષઃ કઃ શુશ્રાવ કથા યયુઃ ।

કસ્મૈ સસ્રુઃ સુદાસે અન્વાપય ઇળાભિર્વૃષ્ટયઃ સહ ॥ ૫.૦૫૩.૦૨

તે મ આહુર્ય આયયુરુપ દ્યુભિર્વિભિર્મદે ।

નરો મર્યા અરેપસ ઇમાન્પશ્યન્નિતિ ષ્ટુહિ ॥ ૫.૦૫૩.૦૩

યે અઞ્જિષુ યે વાશીષુ સ્વભાનવઃ સ્રક્ષુ રુક્મેષુ ખાદિષુ ।

શ્રાયા રથેષુ ધન્વસુ ॥ ૫.૦૫૩.૦૪

યુષ્માકં સ્મા રથાઁ અનુ મુદે દધે મરુતો જીરદાનવઃ ।

વૃષ્ટી દ્યાવો યતીરિવ ॥ ૫.૦૫૩.૦૫

આ યં નરઃ સુદાનવો દદાશુષે દિવઃ કોશમચુચ્યવુઃ ।

વિ પર્જન્યં સૃજન્તિ રોદસી અનુ ધન્વના યન્તિ વૃષ્ટયઃ ॥ ૫.૦૫૩.૦૬

તતૃદાનાઃ સિન્ધવઃ ક્ષોદસા રજઃ પ્ર સસ્રુર્ધેનવો યથા ।

સ્યન્ના અશ્વા ઇવાધ્વનો વિમોચને વિ યદ્વર્તન્ત એન્યઃ ॥ ૫.૦૫૩.૦૭

આ યાત મરુતો દિવ આન્તરિક્ષાદમાદુત ।
માવ સ્થાત પરાવતઃ ॥ ૫.૦૫૩.૦૮
મા વો રસાનિતભા કુભા ક્રુમુર્મા વઃ સિન્ધુર્નિ રીરમત્ ।
મા વઃ પરિ ષ્ઠાત્સરયુઃ પુરીષિણ્યસ્મે ઇત્સુમ્નમસ્તુ વઃ ॥ ૫.૦૫૩.૦૯
તં વઃ શર્ધં રથાનાં ત્વેષં ગણં મારુતં નવ્યસીનામ્ ।
અનુ પ્ર યન્તિ વૃષ્ટયઃ ॥ ૫.૦૫૩.૧૦
શર્ધંશર્ધં વ એષાં વ્રાતંવ્રાતં ગણંગણં સુશસ્તિભિઃ ।
અનુ ક્રામેમ ધીતિભિઃ ॥ ૫.૦૫૩.૧૧
કસ્મા અદ્ય સુજાતાય રાતહવ્યાય પ્ર યયુઃ ।
એના યામેન મરુતઃ ॥ ૫.૦૫૩.૧૨
યેન તોકાય તનયાય ધાન્યં૧ બીજં વહધ્વે અક્ષિતમ્ ।
અસ્મભ્યં તદ્ધત્તન યદ્વ ઈમહે રાધો વિશ્વાયુ સૌભગમ્ ॥ ૫.૦૫૩.૧૩
અતીયામ નિદસ્તિરઃ સ્વસ્તિભિર્હિત્વાવદ્યમરાતીઃ ।
વૃષ્ટ્વી શં યોરાપ ઉસ્રિ ભેષજં સ્યામ મરુતઃ સહ ॥ ૫.૦૫૩.૧૪
સુદેવઃ સમહાસતિ સુવીરો નરો મરુતઃ સ મર્ત્યઃ ।
યં ત્રાયધ્વે સ્યામ તે ॥ ૫.૦૫૩.૧૫
સ્તુહિ ભોજાન્સ્તુવતો અસ્ય યામનિ રણન્ગાવો ન યવસે ।
યતઃ પૂર્વાઁ ઇવ સખીઁરનુ હ્વય ગિરા ગૃણીહિ કામિનઃ ॥ ૫.૦૫૩.૧૬
પ્ર શર્ધાય મારુતાય સ્વભાનવ ઇમાં વાચમનજા પર્વતચ્યુતે ।
ઘર્મસ્તુભે દિવ આ પૃષ્ઠયજ્વને દ્યુમ્નશ્રવસે મહિ નૃમ્ણમર્ચત ॥ ૫.૦૫૪.૦૧
પ્ર વો મરુતસ્તવિષા ઉદન્યવો વયોવૃધો અશ્વયુજઃ પરિજ્રયઃ ।
સં વિદ્યુતા દધતિ વાશતિ ત્રિતઃ સ્વરન્ત્યાપોઽવના પરિજ્રયઃ ॥ ૫.૦૫૪.૦૨
વિદ્યુન્મહસો નરો અશ્મદિદ્યવો વાતત્વિષો મરુતઃ પર્વતચ્યુતઃ ।
અબ્દયા ચિન્મુહુરા હ્રાદુનીવૃતઃ સ્તનયદમા રભસા ઉદોજસઃ ॥ ૫.૦૫૪.૦૩
વ્ય૧ક્તૂન્રુદ્રા વ્યહાનિ શિક્વસો વ્ય૧ન્તરિક્ષં વિ રજાંસિ ધૂતયઃ ।
વિ યદજ્રાઁ અજથ નાવ ઈં યથા વિ દુર્ગાણિ મરુતો નાહ રિષ્યથ ॥ ૫.૦૫૪.૦૪
તદ્વીર્યં વો મરુતો મહિત્વનં દીર્ઘં તતાન સૂર્યો ન યોજનમ્ ।

એતા ન યામે અગૃભીતશોચિષોઽનશ્વદાં યન્ન્યયાતના ગિરિમ્ ॥ ૫.૦૫૪.૦૫
અભ્રાજિ શર્ધો મરુતો યદર્ણસં મોષથા વૃક્ષં કપનેવ વેધસઃ ।
અધ સ્મા નો અરમતિં સજોષસશ્ચક્ષુરિવ યન્તમનુ નેષથા સુગમ્ ॥ ૫.૦૫૪.૦૬
ન સ જીયતે મરુતો ન હન્યતે ન સ્રેધતિ ન વ્યથતે ન રિષ્યતિ ।
નાસ્ય રાય ઉપ દસ્યન્તિ નોતય ઋષિં વા યં રાજાનં વા સુષૂદથ ॥ ૫.૦૫૪.૦૭
નિયુત્વન્તો ગ્રામજિતો યથા નરોઽર્યમણો ન મરુતઃ કબન્ધિનઃ ।
પિન્વન્ત્યુત્સં યદિનાસો અસ્વરન્વ્યુન્દન્તિ પૃથિવીં મધ્વો અન્ધસા ॥ ૫.૦૫૪.૦૮
પ્રવત્વતીયં પૃથિવી મરુદ્ભ્યઃ પ્રવત્વતી દ્યૌર્ભવતિ પ્રયદ્ભ્યઃ ।
પ્રવત્વતીઃ પથ્યા અન્તરિક્ષ્યાઃ પ્રવત્વન્તઃ પર્વતા જીરદાનવઃ ॥ ૫.૦૫૪.૦૯
યન્મરુતઃ સભરસઃ સ્વર્ણરઃ સૂર્ય ઉદિતે મદથા દિવો નરઃ ।
ન વોઽશ્વાઃ શ્રથયન્તાહ સિસ્રતઃ સદ્યો અસ્યાધ્વનઃ પારમશ્નુથ ॥ ૫.૦૫૪.૧૦
અંસેષુ વ ઋષ્ટયઃ પત્સુ ખાદયો વક્ષસ્સુ રુક્મા મરુતો રથે શુભઃ ।
અગ્નિભ્રાજસો વિદ્યુતો ગભસ્ત્યોઃ શિપ્રાઃ શીર્ષસુ વિતતા હિરણ્યયીઃ ॥ ૫.૦૫૪.૧૧
તં નાકમર્યો અગૃભીતશોચિષં રુશત્પિપ્પલં મરુતો વિ ધૂનુથ ।
સમચ્યન્ત વૃજનાતિત્વિષન્ત યત્સ્વરન્તિ ઘોષં વિતતમૃતાયવઃ ॥ ૫.૦૫૪.૧૨
યુષ્માદત્તસ્ય મરુતો વિચેતસો રાયઃ સ્યામ રથ્યો૩ વયસ્વતઃ ।
ન યો યુચ્છતિ તિષ્યો૩ યથા દિવો૩ઽસ્મે રારન્ત મરુતઃ સહસ્રિણમ્ ॥ ૫.૦૫૪.૧૩
યૂયં રયિં મરુતઃ સ્પાર્હવીરં યૂયમૃષિમવથ સામવિપ્રમ્ ।
યૂયમર્વન્તં ભરતાય વાજં યૂયં ધત્થ રાજાનં શ્રુષ્ટિમન્તમ્ ॥ ૫.૦૫૪.૧૪
તદ્વો યામિ દ્રવિણં સદ્યઊતયો યેના સ્વ૧ર્ણ તતનામ નૄઁરભિ ।
ઇદં સુ મે મરુતો હર્યતા વચો યસ્ય તરેમ તરસા શતં હિમાઃ ॥ ૫.૦૫૪.૧૫

પ્રયજ્યવો મરુતો ભ્રાજદૃષ્ટયો બૃહદ્વયો દધિરે રુક્મવક્ષસઃ ।
ઈયન્તે અશ્વૈઃ સુયમેભિરાશુભિઃ શુભં યાતામનુ રથા અવૃત્સત ॥ ૫.૦૫૫.૦૧
સ્વયં દધિધ્વે તવિષીં યથા વિદ બૃહન્મહાન્ત ઉર્વિયા વિ રાજથ ।
ઉતાન્તરિક્ષં મમિરે વ્યોજસા શુભં યાતામનુ રથા અવૃત્સત ॥ ૫.૦૫૫.૦૨
સાકં જાતાઃ સુભ્વઃ સાકમુક્ષિતાઃ શ્રિયે ચિદા પ્રતરં વાવૃધુર્નરઃ ।
વિરોકિણઃ સૂર્યસ્યેવ રશ્મયઃ શુભં યાતામનુ રથા અવૃત્સત ॥ ૫.૦૫૫.૦૩

આભૂષેણ્યં વો મરુતો મહિત્વનં દિદૃક્ષેણ્યં સૂર્યસ્યેવ ચક્ષણમ્ ।
ઉતો અસ્માઁ અમૃતત્વે દધાતન શુભં યાતામનુ રથા અવૃત્સત ॥ ૫.૦૫૫.૦૪
ઉદીરયથા મરુતઃ સમુદ્રતો યૂયં વૃષ્ટિં વર્ષયથા પુરીષિણઃ ।
ન વો દસ્રા ઉપ દસ્યન્તિ ધેનવઃ શુભં યાતામનુ રથા અવૃત્સત ॥ ૫.૦૫૫.૦૫
યદશ્વાન્ધૂર્ષુ પૃષતીરયુગ્ધ્વં હિરણ્યયાન્પ્રત્યત્કાઁ અમુગ્ધ્વમ્ ।
વિશ્વા ઇત્સ્પૃધો મરુતો વ્યસ્યથ શુભં યાતામનુ રથા અવૃત્સત ॥ ૫.૦૫૫.૦૬
ન પર્વતા ન નદ્યો વરન્ત વો યત્રાચિધ્વં મરુતો ગચ્છથેદુ તત્ ।
ઉત દ્યાવાપૃથિવી યાથના પરિ શુભં યાતામનુ રથા અવૃત્સત ॥ ૫.૦૫૫.૦૭
યત્પૂર્વ્યં મરુતો યચ્ચ નૂતનં યદુદ્યતે વસવો યચ્ચ શસ્યતે ।
વિશ્વસ્ય તસ્ય ભવથા નવેદસઃ શુભં યાતામનુ રથા અવૃત્સત ॥ ૫.૦૫૫.૦૮
મૃળત નો મરુતો મા વધિષ્ટનાસ્મભ્યં શર્મ બહુલં વિ યન્તન ।
અધિ સ્તોત્રસ્ય સખ્યસ્ય ગાતન શુભં યાતામનુ રથા અવૃત્સત ॥ ૫.૦૫૫.૦૯
યૂયમસ્માન્નયત વસ્યો અચ્છા નિરંહતિભ્યો મરુતો ગૃણાનાઃ ।
જુષધ્વં નો હવ્યદાતિં યજત્રા વયં સ્યામ પતયો રયીણામ્ ॥ ૫.૦૫૫.૧૦

અગ્ને શર્ધન્તમા ગણં પિષ્ટં રુક્મેભિરઞ્જિભિઃ ।
વિશો અદ્ય મરુતામવ હ્વયે દિવશ્ચિદ્રોચનાદધિ ॥ ૫.૦૫૬.૦૧
યથા ચિન્મન્યસે હૃદા તદિન્મે જગ્મુરાશસઃ ।
યે તે નેદિષ્ઠં હવનાન્યાગમન્તાન્વર્ધ ભીમસંદૃશઃ ॥ ૫.૦૫૬.૦૨
મીળ્હુષ્મતીવ પૃથિવી પરાહતા મદન્ત્યેત્યસ્મદા ।
ઋક્ષો ન વો મરુતઃ શિમીવાઁ અમો દુધ્રો ગૌરિવ ભીમયુઃ ॥ ૫.૦૫૬.૦૩
નિ યે રિણન્ત્યોજસા વૃથા ગાવો ન દુર્ધુરઃ ।
અશ્માનં ચિત્સ્વર્યં૧ પર્વતં ગિરિં પ્ર ચ્યાવયન્તિ યામભિઃ ॥ ૫.૦૫૬.૦૪
ઉત્તિષ્ઠ નૂનમેષાં સ્તોમૈઃ સમુક્ષિતાનામ્ ।
મરુતાં પુરુતમમપૂર્વ્યં ગવાં સર્ગમિવ હ્વયે ॥ ૫.૦૫૬.૦૫
યુઙ્ગ્ધ્વં હ્યરુષી રથે યુઙ્ગ્ધ્વં રથેષુ રોહિતઃ ।
યુઙ્ગ્ધ્વં હરી અજિરા ધુરિ વોળ્હવે વહિષ્ઠા ધુરિ વોળ્હવે ॥ ૫.૦૫૬.૦૬
ઉત સ્ય વાજ્યરુષસ્તુવિષ્વણિરિહ સ્મ ધાયિ દર્શતઃ ।

મા વો યામેષુ મરુતશ્ચિરં કરત્પ્ર તં રથેષુ ચોદત ॥ ૫.૦૫૬.૦૭
રથં નુ મારુતં વયં શ્રવસ્યુમા હુવામહે ।
આ યસ્મિન્તસ્થૌ સુરણાનિ બિભ્રતી સચા મરુત્સુ રોદસી ॥ ૫.૦૫૬.૦૮
તં વઃ શર્ધં રથેશુભં ત્વેષં પનસ્યુમા હુવે ।
યસ્મિન્સુજાતા સુભગા મહીયતે સચા મરુત્સુ મીળ્હુષી ॥ ૫.૦૫૬.૦૯
આ રુદ્રાસ ઇન્દ્રવન્તઃ સજોષસો હિરણ્યરથાઃ સુવિતાય ગન્તન ।
ઇયં વો અસ્મત્પ્રતિ હર્યતે મતિસ્તૃષ્ણજે ન દિવ ઉત્સા ઉદન્યવે ॥ ૫.૦૫૭.૦૧
વાશીમન્ત ઋષ્ટિમન્તો મનીષિણઃ સુધન્વાન ઇષુમન્તો નિષઙ્ગિણઃ ।
સ્વશ્વાઃ સ્થ સુરથાઃ પૃશ્નિમાતરઃ સ્વાયુધા મરુતો યાથના શુભમ્ ॥ ૫.૦૫૭.૦૨
ધૂનુથ દ્યાં પર્વતાન્દાશુષે વસુ નિ વો વના જિહતે યામનો ભિયા ।
કોપયથ પૃથિવીં પૃશ્નિમાતરઃ શુભે યદુગ્રાઃ પૃષતીરયુગ્ધ્વમ્ ॥ ૫.૦૫૭.૦૩
વાતત્વિષો મરુતો વર્ષનિર્ણિજો યમા ઇવ સુસદૃશઃ સુપેશસઃ ।
પિશઙ્ગાશ્વા અરુણાશ્વા અરેપસઃ પ્રત્વક્ષસો મહિના દ્યૌરિવોરવઃ ॥ ૫.૦૫૭.૦૪
પુરુદ્રપ્સા અઞ્જિમન્તઃ સુદાનવસ્ત્વેષસંદૃશો અનવભ્રરાધસઃ ।
સુજાતાસો જનુષા રુક્મવક્ષસો દિવો અર્કા અમૃતં નામ ભેજિરે ॥ ૫.૦૫૭.૦૫
ઋષ્ટયો વો મરુતો અંસયોરધિ સહ ઓજો બાહ્વોર્વો બલં હિતમ્ ।
નૃમ્ણા શીર્ષસ્વાયુધા રથેષુ વો વિશ્વા વઃ શ્રીરધિ તનૂષુ પિપિશે ॥ ૫.૦૫૭.૦૬
ગોમદશ્વાવદ્રથવત્સુવીરં ચન્દ્રવદ્રાધો મરુતો દદા નઃ ।
પ્રશસ્તિં નઃ કૃણુત રુદ્રિયાસો ભક્ષીય વોઽવસો દૈવ્યસ્ય ॥ ૫.૦૫૭.૦૭
હયે નરો મરુતો મૃળતા નસ્તુવીમઘાસો અમૃતા ઋતજ્ઞાઃ ।
સત્યશ્રુતઃ કવયો યુવાનો બૃહદ્ગિરયો બૃહદુક્ષમાણાઃ ॥ ૫.૦૫૭.૦૮
તમુ નૂનં તવિષીમન્તમેષાં સ્તુષે ગણં મારુતં નવ્યસીનામ્ ।
ય આશ્વશ્વા અમવદ્વહન્ત ઉતેશિરે અમૃતસ્ય સ્વરાજઃ ॥ ૫.૦૫૮.૦૧
ત્વેષં ગણં તવસં ખાદિહસ્તં ધુનિવ્રતં માયિનં દાતિવારમ્ ।
મયોભુવો યે અમિતા મહિત્વા વન્દસ્વ વિપ્ર તુવિરાધસો નૄન્ ॥ ૫.૦૫૮.૦૨
આ વો યન્તૂદવાહાસો અદ્ય વૃષ્ટિં યે વિશ્વે મરુતો જુનન્તિ ।
અયં યો અગ્નિર્મરુતઃ સમિદ્ધ એતં જુષધ્વં કવયો યુવાનઃ ॥ ૫.૦૫૮.૦૩

યૂયં રાજાનમિર્યં જનાય વિભ્વતષ્ટં જનયથા યજત્રાઃ ।
યુષ્મદેતિ મુષ્ટિહા બાહુજૂતો યુષ્મત્સદશ્વો મરુતઃ સુવીરઃ ॥ ૫.૦૫૮.૦૪
અરા ઇવેદચરમા અહેવ પ્રપ્ર જાયન્તે અકવા મહોભિઃ ।
પૃશ્નેઃ પુત્રા ઉપમાસો રભિષ્ઠાઃ સ્વયા મત્યા મરુતઃ સં મિમિક્ષુઃ ॥ ૫.૦૫૮.૦૫
યત્પ્રાયાસિષ્ટ પૃષતીભિરશ્વૈર્વીળુપવિભિર્મરુતો રથેભિઃ ।
ક્ષોદન્ત આપો રિણતે વનાન્યવોસ્રિયો વૃષભઃ ક્રન્દતુ દ્યૌઃ ॥ ૫.૦૫૮.૦૬
પ્રથિષ્ટ યામન્પૃથિવી ચિદેષાં ભર્તેવ ગર્ભં સ્વમિચ્છવો ધુઃ ।
વાતાન્હ્યશ્વાન્ધુર્યાયુયુજ્રે વર્ષં સ્વેદં ચક્રિરે રુદ્રિયાસઃ ॥ ૫.૦૫૮.૦૭
હયે નરો મરુતો મૃળતા નસ્તુવીમઘાસો અમૃતા ઋતજ્ઞાઃ ।
સત્યશ્રુતઃ કવયો યુવાનો બૃહદ્ગિરયો બૃહદુક્ષમાણાઃ ॥ ૫.૦૫૮.૦૮

પ્ર વઃ સ્પળક્રન્સુવિતાય દાવનેઽર્ચા દિવે પ્ર પૃથિવ્યા ઋતં ભરે ।
ઉક્ષન્તે અશ્વાન્તરુષન્ત આ રજોઽનુ સ્વં ભાનું શ્રથયન્તે અર્ણવૈઃ ॥ ૫.૦૫૯.૦૧
અમાદેષાં ભિયસા ભૂમિરેજતિ નૌર્ન પૂર્ણા ક્ષરતિ વ્યથિર્યતી ।
દૂરેદૃશો યે ચિતયન્ત એમભિરન્તર્મહે વિદથે યેતિરે નરઃ ॥ ૫.૦૫૯.૦૨
ગવામિવ શ્રિયસે શૃઙ્ગમુત્તમં સૂર્યો ન ચક્ષૂ રજસો વિસર્જને ।
અત્યા ઇવ સુભ્વ૧શ્ચારવઃ સ્થન મર્યા ઇવ શ્રિયસે ચેતથા નરઃ ॥ ૫.૦૫૯.૦૩
કો વો મહાન્તિ મહતામુદશ્નવત્કસ્કાવ્યા મરુતઃ કો હ પૌંસ્યા ।
યૂયં હ ભૂમિં કિરણં ન રેજથ પ્ર યદ્ભરધ્વે સુવિતાય દાવને ॥ ૫.૦૫૯.૦૪
અશ્વા ઇવેદરુષાસઃ સબન્ધવઃ શૂરા ઇવ પ્રયુધઃ પ્રોત યુયુધુઃ ।
મર્યા ઇવ સુવૃધો વાવૃધુર્નરઃ સૂર્યસ્ય ચક્ષુઃ પ્ર મિનન્તિ વૃષ્ટિભિઃ ॥ ૫.૦૫૯.૦૫
તે અજ્યેષ્ઠા અકનિષ્ઠાસ ઉદ્ભિદોઽમધ્યમાસો મહસા વિ વાવૃધુઃ ।
સુજાતાસો જનુષા પૃશ્નિમાતરો દિવો મર્યા આ નો અચ્છા જિગાતન ॥ ૫.૦૫૯.૦૬
વયો ન યે શ્રેણીઃ પપ્તુરોજસાન્તાન્દિવો બૃહતઃ સાનુનસ્પરિ ।
અશ્વાસ એષામુભયે યથા વિદુઃ પ્ર પર્વતસ્ય નભનૂઁરચુચ્યવુઃ ॥ ૫.૦૫૯.૦૭
મિમાતુ દ્યૌરદિતિર્વીતયે નઃ સં દાનુચિત્રા ઉષસો યતન્તામ્ ।
આચુચ્યવુર્દિવ્યં કોશમેત ઋષે રુદ્રસ્ય મરુતો ગૃણાનાઃ ॥ ૫.૦૫૯.૦૮

ઈળે અગ્નિં સ્વવસં નમોભિરિહ પ્રસત્તો વિ ચયત્કૃતં નઃ ।

રથૈરિવ પ્ર ભરે વાજયદ્ભિઃ પ્રદક્ષિણિન્મરુતાં સ્તોમમૃધ્યામ્ ॥ ૫.૦૬૦.૦૧

આ યે તસ્થુઃ પૃષતીષુ શ્રુતાસુ સુખેષુ રુદ્રા મરુતો રથેષુ ।

વના ચિદુગ્રા જિહતે નિ વો ભિયા પૃથિવી ચિદ્રેજતે પર્વતશ્ચિત્ ॥ ૫.૦૬૦.૦૨

પર્વતશ્ચિન્મહિ વૃદ્ધો બિભાય દિવશ્ચિત્સાનુ રેજત સ્વને વઃ ।

યત્ક્રીળથ મરુત ઋષ્ટિમન્ત આપ ઇવ સધ્ર્યઞ્ચો ધવધ્વે ॥ ૫.૦૬૦.૦૩

વરા ઇવેદ્રૈવતાસો હિરણ્યૈરભિ સ્વધાભિસ્તન્વઃ પિપિશ્રે ।

શ્રિયે શ્રેયાંસસ્તવસો રથેષુ સત્રા મહાંસિ ચક્રિરે તનૂષુ ॥ ૫.૦૬૦.૦૪

અજ્યેષ્ઠાસો અકનિષ્ઠાસ એતે સં ભ્રાતરો વાવૃધુઃ સૌભગાય ।

યુવા પિતા સ્વપા રુદ્ર એષાં સુદુઘા પૃશ્નિઃ સુદિના મરુદ્ભ્યઃ ॥ ૫.૦૬૦.૦૫

યદુત્તમે મરુતો મધ્યમે વા યદ્વાવમે સુભગાસો દિવિ ષ્ઠ ।

અતો નો રુદ્રા ઉત વા ન્વ૧સ્યાગ્ને વિત્તાદ્ધવિષો યદ્યજામ ॥ ૫.૦૬૦.૦૬

અગ્નિશ્ચ યન્મરુતો વિશ્વવેદસો દિવો વહધ્વ ઉત્તરાદધિ ષ્ણુભિઃ ।

તે મન્દસાના ધુનયો રિશાદસો વામં ધત્ત યજમાનાય સુન્વતે ॥ ૫.૦૬૦.૦૭

અગ્ને મરુદ્ભિઃ શુભયદ્ભિરૃક્વભિઃ સોમં પિબ મન્દસાનો ગણશ્રિભિઃ ।

પાવકેભિર્વિશ્વમિન્વેભિરાયુભિર્વૈશ્વાનર પ્રદિવા કેતુના સજૂઃ ॥ ૫.૦૬૦.૦૮

કે ષ્ઠા નરઃ શ્રેષ્ઠતમા ય એકએક આયય ।

પરમસ્યાઃ પરાવતઃ ॥ ૫.૦૬૧.૦૧

ક્વ૧ વોઽશ્વાઃ ક્વાઉભીશવઃ કથં શેક કથા યય ।

પૃષ્ઠે સદો નસોર્યમઃ ॥ ૫.૦૬૧.૦૨

જઘને ચોદ એષાં વિ સક્થાનિ નરો યમુઃ ।

પુત્રકૃથે ન જનયઃ ॥ ૫.૦૬૧.૦૩

પરા વીરાસ એતન મર્યાસો ભદ્રજાનયઃ ।

અગ્નિતપો યથાસથ ॥ ૫.૦૬૧.૦૪

સનત્સાશ્વ્યં પશુમુત ગવ્યં શતાવયમ્ ।

શ્યાવાશ્વસ્તુતાય યા દોર્વીરાયોપબર્બૃહત્ ॥ ૫.૦૬૧.૦૫

ઉત ત્વા સ્ત્રી શશીયસી પુંસો ભવતિ વસ્યસી ।

અદેવત્રાદરાધસઃ ॥ ૫.૦૬૧.૦૬

વિ યા જાનાતિ જસુરિં વિ તૃષ્યન્તં વિ કામિનમ્ ।
દેવત્રા કૃણુતે મનઃ ॥ ૫.૦૬૧.૦૭
ઉત ઘા નેમો અસ્તુતઃ પુમાઁ ઇતિ બ્રુવે પણિઃ ।
સ વૈરદેય ઇત્સમઃ ॥ ૫.૦૬૧.૦૮
ઉત મેઽરપદ્યુવતિર્મમન્દુષી પ્રતિ શ્યાવાય વર્તનિમ્ ।
વિ રોહિતા પુરુમીળ્હાય યેમતુર્વિપ્રાય દીર્ઘયશસે ॥ ૫.૦૬૧.૦૯
યો મે ધેનૂનાં શતં વૈદદશ્વિર્યથા દદત્ ।
તરન્ત ઇવ મંહના ॥ ૫.૦૬૧.૧૦
ય ઈં વહન્ત આશુભિઃ પિબન્તો મદિરં મધુ ।
અત્ર શ્રવાંસિ દધિરે ॥ ૫.૦૬૧.૧૧
યેષાં શ્રિયાધિ રોદસી વિભ્રાજન્તે રથેષ્વા ।
દિવિ રુક્મ ઇવોપરિ ॥ ૫.૦૬૧.૧૨
યુવા સ મારુતો ગણસ્ત્વેષરથો અનેદ્યઃ ।
શુભંયાવાપ્રતિષ્કુતઃ ॥ ૫.૦૬૧.૧૩
કો વેદ નૂનમેષાં યત્રા મદન્તિ ધૂતયઃ ।
ઋતજાતા અરેપસઃ ॥ ૫.૦૬૧.૧૪
યૂયં મર્તં વિપન્યવઃ પ્રણેતાર ઇત્થા ધિયા ।
શ્રોતારો યામહૂતિષુ ॥ ૫.૦૬૧.૧૫
તે નો વસૂનિ કામ્યા પુરુશ્ચન્દ્રા રિશાદસઃ ।
આ યજ્ઞિયાસો વવૃત્તન ॥ ૫.૦૬૧.૧૬
એતં મે સ્તોમમૂર્મ્યે દાર્ભ્યાય પરા વહ ।
ગિરો દેવિ રથીરિવ ॥ ૫.૦૬૧.૧૭
ઉત મે વોચતાદિતિ સુતસોમે રથવીતૌ ।
ન કામો અપ વેતિ મે ॥ ૫.૦૬૧.૧૮
એષ ક્ષેતિ રથવીતિર્મઘવા ગોમતીરનુ ।
પર્વતેષ્વપશ્રિતઃ ॥ ૫.૦૬૧.૧૯
ઋતેન ઋતમપિહિતં ધ્રુવં વાં સૂર્યસ્ય યત્ર વિમુચન્ત્યશ્વાન્ ।

દશ શતા સહ તસ્થુસ્તદેકં દેવાનાં શ્રેષ્ઠં વપુષામપશ્યમ્ ॥ ૫.૦૬૨.૦૧
તત્સુ વાં મિત્રાવરુણા મહિત્વમીર્મા તસ્થુષીરહભિર્દુદુહ્રે ।
વિશ્વાઃ પિન્વથઃ સ્વસરસ્ય ધેના અનુ વામેકઃ પવિરા વવર્ત ॥ ૫.૦૬૨.૦૨
અધારયતં પૃથિવીમુત દ્યાં મિત્રરાજાના વરુણા મહોભિઃ ।
વર્ધયતમોષધીઃ પિન્વતં ગા અવ વૃષ્ટિં સૃજતં જીરદાનૂ ॥ ૫.૦૬૨.૦૩
આ વામશ્વાસઃ સુયુજો વહન્તુ યતરશ્મય ઉપ યન્ત્વર્વાક્ ।
ઘૃતસ્ય નિર્ણિગનુ વર્તતે વામુપ સિન્ધવઃ પ્રદિવિ ક્ષરન્તિ ॥ ૫.૦૬૨.૦૪
અનુ શ્રુતામમતિં વર્ધદુર્વી બર્હિરિવ યજુષા રક્ષમાણા ।
નમસ્વન્તા ધૃતદક્ષાધિ ગર્તે મિત્રાસાથે વરુણેળાસ્વન્તઃ ॥ ૫.૦૬૨.૦૫
અક્રવિહસ્તા સુકૃતે પરસ્પા યં ત્રાસાથે વરુણેળાસ્વન્તઃ ।
રાજાના ક્ષત્રમહૃણીયમાના સહસ્રસ્થૂણં બિભૃથઃ સહ દ્વૌ ॥ ૫.૦૬૨.૦૬
હિરણ્યનિર્ણિગયો અસ્ય સ્થૂણા વિ ભ્રાજતે દિવ્યશ્વાજનીવ ।
ભદ્રે ક્ષેત્રે નિમિતા તિલ્વિલે વા સનેમ મધ્વો અધિગર્ત્યસ્ય ॥ ૫.૦૬૨.૦૭
હિરણ્યરૂપમુષસો વ્યુષ્ટાવયઃસ્થૂણમુદિતા સૂર્યસ્ય ।
આ રોહથો વરુણ મિત્ર ગર્તમતશ્ચક્ષાથે અદિતિં દિતિં ચ ॥ ૫.૦૬૨.૦૮
યદ્બંહિષ્ઠં નાતિવિધે સુદાનૂ અચ્છિદ્રં શર્મ ભુવનસ્ય ગોપા ।
તેન નો મિત્રાવરુણાવવિષ્ટં સિષાસન્તો જિગીવાંસઃ સ્યામ ॥ ૫.૦૬૨.૦૯

ઋતસ્ય ગોપાવધિ તિષ્ઠથો રથં સત્યધર્માણા પરમે વ્યોમનિ ।
યમત્ર મિત્રાવરુણાવથો યુવં તસ્મૈ વૃષ્ટિર્મધુમત્પિન્વતે દિવઃ ॥ ૫.૦૬૩.૦૧
સમ્રાજાવસ્ય ભુવનસ્ય રાજથો મિત્રાવરુણા વિદથે સ્વર્દૃશા ।
વૃષ્ટિં વાં રાધો અમૃતત્વમીમહે દ્યાવાપૃથિવી વિ ચરન્તિ તન્યવઃ ॥ ૫.૦૬૩.૦૨
સમ્રાજા ઉગ્રા વૃષભા દિવસ્પતી પૃથિવ્યા મિત્રાવરુણા વિચર્ષણી ।
ચિત્રેભિરભ્રૈરુપ તિષ્ઠથો રવં દ્યાં વર્ષયથો અસુરસ્ય માયયા ॥ ૫.૦૬૩.૦૩
માયા વાં મિત્રાવરુણા દિવિ શ્રિતા સૂર્યો જ્યોતિશ્ચરતિ ચિત્રમાયુધમ્ ।
તમભ્રેણ વૃષ્ટ્યા ગૂહથો દિવિ પર્જન્ય દ્રપ્સા મધુમન્ત ઈરતે ॥ ૫.૦૬૩.૦૪
રથં યુઞ્જતે મરુતઃ શુભે સુખં શૂરો ન મિત્રાવરુણા ગવિષ્ટિષુ ।
રજાંસિ ચિત્રા વિ ચરન્તિ તન્યવો દિવઃ સમ્રાજા પયસા ન ઉક્ષતમ્ ॥ ૫.૦૬૩.૦૫

વાચં સુ મિત્રાવરુણાવિરાવતીં પર્જન્યશ્ચિત્રાં વદતિ ત્વિષીમતીમ્ ।
અભ્રા વસત મરુતઃ સુ માયયા દ્યાં વર્ષયતમરુણામરેપસમ્ ॥ ૫.૦૬૩.૦૬
ધર્મણા મિત્રાવરુણા વિપશ્ચિતા વ્રતા રક્ષેથે અસુરસ્ય માયયા ।
ઋતેન વિશ્વં ભુવનં વિ રાજથઃ સૂર્યમા ધત્થો દિવિ ચિત્ર્યં રથમ્ ॥ ૫.૦૬૩.૦૭
વરુણં વો રિશાદસમૃચા મિત્રં હવામહે ।
પરિ વ્રજેવ બાહ્વોર્જગન્વાંસા સ્વર્ણરમ્ ॥ ૫.૦૬૪.૦૧
તા બાહવા સુચેતુના પ્ર યન્તમસ્મા અર્ચતે ।
શેવં હિ જાર્યં વાં વિશ્વાસુ ક્ષાસુ જોગુવે ॥ ૫.૦૬૪.૦૨
યન્નૂનમશ્યાં ગતિં મિત્રસ્ય યાયાં પથા ।
અસ્ય પ્રિયસ્ય શર્મણ્યહિંસાનસ્ય સશ્ચિરે ॥ ૫.૦૬૪.૦૩
યુવાભ્યાં મિત્રાવરુણોપમં ધેયામૃચા ।
યદ્ધ ક્ષયે મઘોનાં સ્તોતૄણાં ચ સ્પૂર્ધસે ॥ ૫.૦૬૪.૦૪
આ નો મિત્ર સુદીતિભિર્વરુણશ્ચ સધસ્થ આ ।
સ્વે ક્ષયે મઘોનાં સખીનાં ચ વૃધસે ॥ ૫.૦૬૪.૦૫
યુવં નો યેષુ વરુણ ક્ષત્રં બૃહચ્ચ બિભૃથઃ ।
ઉરુ ણો વાજસાતયે કૃતં રાયે સ્વસ્તયે ॥ ૫.૦૬૪.૦૬
ઉચ્છન્ત્યાં મે યજતા દેવક્ષત્રે રુશદ્ગવિ ।
સુતં સોમં ન હસ્તિભિરા પડ્ભિર્ધાવતં નરા બિભ્રતાવર્ચનાનસમ્ ॥ ૫.૦૬૪.૦૭
યશ્ચિકેત સ સુક્રતુર્દેવત્રા સ બ્રવીતુ નઃ ।
વરુણો યસ્ય દર્શતો મિત્રો વા વનતે ગિરઃ ॥ ૫.૦૬૫.૦૧
તા હિ શ્રેષ્ઠવર્ચસા રાજાના દીર્ઘશ્રુત્તમા ।
તા સત્પતી ઋતાવૃધ ઋતાવાના જનેજને ॥ ૫.૦૬૫.૦૨
તા વામિયાનોऽવસે પૂર્વા ઉપ બ્રુવે સચા ।
સ્વશ્વાસઃ સુ ચેતુના વાજાઁ અભિ પ્ર દાવને ॥ ૫.૦૬૫.૦૩
મિત્રો અંહોશ્ચિદાદુરુ ક્ષયાય ગાતું વનતે ।
મિત્રસ્ય હિ પ્રતૂર્વતઃ સુમતિરસ્તિ વિધતઃ ॥ ૫.૦૬૫.૦૪
વયં મિત્રસ્યાવસિ સ્યામ સપ્રથસ્તમે ।

અનેહસસ્ત્વોતયઃ સત્રા વરુણશેષસઃ ॥ ૫.૦૬૫.૦૫
યુવં મિત્રેમં જનં યતથઃ સં ચ નયથઃ ।
મા મઘોનઃ પરિ ખ્યતં મો અસ્માકમૃષીણાં ગોપીથે ન ઉરુષ્યતમ્ ॥ ૫.૦૬૫.૦૬
આ ચિકિતાન સુક્રતૂ દેવૌ મર્ત રિશાદસા ।
વરુણાય ઋતપેશસે દધીત પ્રયસે મહે ॥ ૫.૦૬૬.૦૧
તા હિ ક્ષત્રમવિહ્રુતં સમ્યગસુર્ય઼માશાતે ।
અધ વ્રતેવ માનુષં સ્વર્ણ ધાયિ દર્શતમ્ ॥ ૫.૦૬૬.૦૨
તા વામેષે રથાનામુર્વીં ગવ્યૂતિમેષામ્ ।
રાતહવ્યસ્ય સુષ્ટુતિં દધૃક્સ્તોમૈર્મનામહે ॥ ૫.૦૬૬.૦૩
અધા હિ કાવ્યા યુવં દક્ષસ્ય પૂર્ભિરદ્ભુતા ।
નિ કેતુના જનાનાં ચિકેથે પૂતદક્ષસા ॥ ૫.૦૬૬.૦૪
તદૃતં પૃથિવિ બૃહચ્છ્રવએષ ઋષીણામ્ ।
જ્રયસાનાવરં પૃથ્વતિ ક્ષરન્તિ યામભિઃ ॥ ૫.૦૬૬.૦૫
આ યદ્વામીયચક્ષસા મિત્ર વયં ચ સૂરયઃ ।
વ્યચિષ્ઠે બહુપાય્યે યતેમહિ સ્વરાજ્યે ॥ ૫.૦૬૬.૦૬
બળિત્થા દેવ નિષ્કૃતમાદિત્યા યજતં બૃહત્ ।
વરુણ મિત્રાર્યમન્વર્ષિષ્ઠં ક્ષત્રમાશાથે ॥ ૫.૦૬૭.૦૧
આ યદ્યોનિં હિરણ્યયં વરુણ મિત્ર સદથઃ ।
ધર્તારા ચર્ષણીનાં યન્તં સુમ્નં રિશાદસા ॥ ૫.૦૬૭.૦૨
વિશ્વે હિ વિશ્વવેદસો વરુણો મિત્રો અર્યમા ।
વ્રતા પદેવ સશ્ચિરે પાન્તિ મર્ત્યં રિષઃ ॥ ૫.૦૬૭.૦૩
તે હિ સત્યા ઋતસ્પૃશ ઋતાવાનો જનેજને ।
સુનીથાસઃ સુદાનવોંઽહોશ્ચિદુરુચક્રયઃ ॥ ૫.૦૬૭.૦૪
કો નુ વાં મિત્રાસ્તુતો વરુણો વા તનૂનામ્ ।
તત્સુ વામેષતે મતિરત્રિભ્ય એષતે મતિઃ ॥ ૫.૦૬૭.૦૫
પ્ર વો મિત્રાય ગાયત વરુણાય વિપા ગિરા ।
મહિક્ષત્રાવૃતં બૃહત્ ॥ ૫.૦૬૮.૦૧

સમ્રાજા યા ઘૃતયોની મિત્રશ્ચોભા વરુણશ્ચ ।
દેવા દેવેષુ પ્રશસ્તા ॥ ૫.૦૬૮.૦૨
તા નઃ શક્તં પાર્થિવસ્ય મહો રાયો દિવ્યસ્ય ।
મહિ વાં ક્ષત્રં દેવેષુ ॥ ૫.૦૬૮.૦૩
ઋતમૃતેન સપન્તેષિરં દક્ષમાશાતે ।
અદ્રુહા દેવૌ વર્ધેતે ॥ ૫.૦૬૮.૦૪
વૃષ્ટિદ્યાવા રીત્યાપેષસ્પતી દાનુમત્યાઃ ।
બૃહન્તં ગર્તમાશાતે ॥ ૫.૦૬૮.૦૫

ત્રી રોચના વરુણ ત્રીઁરુત દ્યૂન્ત્રીણિ મિત્ર ધારયથો રજાંસિ ।
વાવૃધાનાવમતિં ક્ષત્રિયસ્યાનુ વ્રતં રક્ષમાણાવજુર્યમ્ ॥ ૫.૦૬૯.૦૧
ઇરાવતીર્વરુણ ધેનવો વાં મધુમદ્વાં સિન્ધવો મિત્ર દુહ્રે ।
ત્રયસ્તસ્થુર્વૃષભાસસ્તિસૃણાં ધિષણાનાં રેતોધા વિ દ્યુમન્તઃ ॥ ૫.૦૬૯.૦૨
પ્રાતર્દેવીમદિતિં જોહવીમિ મધ્યંદિન ઉદિતા સૂર્યસ્ય ।
રાયે મિત્રાવરુણા સર્વતાતેળે તોકાય તનયાય શં યોઃ ॥ ૫.૦૬૯.૦૩
યા ધર્તારા રજસો રોચનસ્યોતાદિત્યા દિવ્યા પાર્થિવસ્ય ।
ન વાં દેવા અમૃતા આ મિનન્તિ વ્રતાનિ મિત્રાવરુણા ધ્રુવાણિ ॥ ૫.૦૬૯.૦૪

પુરુરુણા ચિદ્ધ્યસ્ત્યવો નૂનં વાં વરુણ ।
મિત્ર વંસિ વાં સુમતિમ્ ॥ ૫.૦૭૦.૦૧
તા વાં સમ્યગદ્રુહ્વાણેષમશ્યામ ધાયસે ।
વયં તે રુદ્રા સ્યામ ॥ ૫.૦૭૦.૦૨
પાતં નો રુદ્રા પાયુભિરુત ત્રાયેથાં સુત્રાત્રા ।
તુર્યામ દસ્યૂન્તનૂભિઃ ॥ ૫.૦૭૦.૦૩
મા કસ્યાદ્ભુતક્રતૂ યક્ષં ભુજેમા તનૂભિઃ ।
મા શેષસા મા તનસા ॥ ૫.૦૭૦.૦૪

આ નો ગન્તં રિશાદસા વરુણ મિત્ર બર્હણા ।
ઉપેમં ચારુમધ્વરમ્ ॥ ૫.૦૭૧.૦૧
વિશ્વસ્ય હિ પ્રચેતસા વરુણ મિત્ર રાજથઃ ।

ઇશાના પિપ્યતં ધિયઃ ॥ ૫.૦૭૧.૦૨
ઉપ નઃ સુતમા ગતં વરુણ મિત્ર દાશુષઃ ।
અસ્ય સોમસ્ય પીતયે ॥ ૫.૦૭૧.૦૩

આ મિત્રે વરુણે વયં ગીર્ભિર્જુહુમો અત્રિવત્ ।
નિ બર્હિષિ સદતં સોમપીતયે ॥ ૫.૦૭૨.૦૧
વ્રતેન સ્થો ધ્રુવક્ષેમા ધર્મણા યાતયજ્જના ।
નિ બર્હિષિ સદતં સોમપીતયે ॥ ૫.૦૭૨.૦૨
મિત્રશ્ચ નો વરુણશ્ચ જુષેતાં યજ્ઞમિષ્ટયે ।
નિ બર્હિષિ સદતાં સોમપીતયે ॥ ૫.૦૭૨.૦૩

યદદ્ય સ્થઃ પરાવતિ યદર્વાવત્યશ્વિના ।
યદ્વા પુરૂ પુરુભુજા યદન્તરિક્ષ આ ગતમ્ ॥ ૫.૦૭૩.૦૧
ઇહ ત્યા પુરુભૂતમા પુરૂ દંસાંસિ બિભ્રતા ।
વરસ્યા યામ્યધ્રિગૂ હુવે તુવિષ્ટમા ભુજે ॥ ૫.૦૭૩.૦૨
ઈર્માન્યદ્વપુષે વપુશ્ચક્રં રથસ્ય યેમથુઃ ।
પર્યન્યા નાહુષા યુગા મહ્ના રજાંસિ દીયથઃ ॥ ૫.૦૭૩.૦૩
તદૂ ષુ વામેના કૃતં વિશ્વા યદ્વામનુ ષ્ટવે ।
નાના જાતાવરેપસા સમસ્મે બન્ધુમેયથુઃ ॥ ૫.૦૭૩.૦૪
આ યદ્વાં સૂર્યા રથં તિષ્ઠદ્રઘુષ્યદં સદા ।
પરિ વામરુષા વયો ઘૃણા વરન્ત આતપઃ ॥ ૫.૦૭૩.૦૫
યુવોરત્રિશ્ચિકેતતિ નરા સુમ્નેન ચેતસા ।
ઘર્મં યદ્વામરેપસં નાસત્યાસ્ના ભુરણ્યતિ ॥ ૫.૦૭૩.૦૬
ઉગ્રો વાં કકુહો યયિઃ શ઼ૃણ્વે યામેષુ સંતનિઃ ।
યદ્વાં દંસોભિરશ્વિનાત્રિર્નરાવવર્તતિ ॥ ૫.૦૭૩.૦૭
મધ્વ ઊ ષુ મધૂયુવા રુદ્રા સિષક્તિ પિપ્યુષી ।
યત્સમુદ્રાતિ પર્ષથઃ પક્વાઃ પૃક્ષો ભરન્ત વામ્ ॥ ૫.૦૭૩.૦૮
સત્યમિદ્વા ઉ અશ્વિના યુવામાહુર્મયોભુવા ।
તા યામન્યામહૂતમા યામન્ના મૃળયત્તમા ॥ ૫.૦૭૩.૦૯

ઇમા બ્રહ્માણિ વર્ધનાશ્વિભ્યાં સન્તુ શંતમા ।
યા તક્ષામ રથાઁ ઇવાવોચામ બૃહન્નમઃ ॥ ૫.૦૭૩.૧૦

કૂષ્ઠો દેવાવશ્વિનાદ્યા દિવો મનાવસૂ ।
તચ્છ્રવથો વૃષણ્વસૂ અત્રિર્વામા વિવાસતિ ॥ ૫.૦૭૪.૦૧
કુહ ત્યા કુહ નુ શ્રુતા દિવિ દેવા નાસત્યા ।
કસ્મિન્ના યતથો જને કો વાં નદીનાં સચા ॥ ૫.૦૭૪.૦૨
કં યાથઃ કં હ ગચ્છથઃ કમચ્છા યુઞ્જાથે રથમ્ ।
કસ્ય બ્રહ્માણિ રણ્યથો વયં વામુશ્મસીષ્ટયે ॥ ૫.૦૭૪.૦૩
પૌરં ચિદ્ધ્યુદપ્રુતં પૌર પૌરાય જિન્વથઃ ।
યદીં ગૃભીતતાતયે સિંહમિવ દ્રુહસ્પદે ॥ ૫.૦૭૪.૦૪
પ્ર ચ્યવાનાજ્જુજુરુષો વવ્રિમત્કં ન મુઞ્ચથઃ ।
યુવા યદી કૃથઃ પુનરા કામમૃણ્વે વધ્વઃ ॥ ૫.૦૭૪.૦૫
અસ્તિ હિ વામિહ સ્તોતા સ્મસિ વાં સંદૃશિ શ્રિયે ।
નૂ શ્રુતં મ આ ગતમવોભિર્વાજિનીવસૂ ॥ ૫.૦૭૪.૦૬
કો વામદ્ય પુરૂણામા વવ્ને મર્ત્યાનામ્ ।
કો વિપ્રો વિપ્રવાહસા કો યજ્ઞૈર્વાજિનીવસૂ ॥ ૫.૦૭૪.૦૭
આ વાં રથો રથાનાં યેષ્ઠો યાત્વશ્વિના ।
પુરૂ ચિદસ્મયુસ્તિર આઙ્ગૂષો મર્ત્યેષ્વા ॥ ૫.૦૭૪.૦૮
શમૂ ષુ વાં મધૂયુવાસ્માકમસ્તુ ચર્કૃતિઃ ।
અર્વાચીના વિચેતસા વિભિઃ શ્યેનેવ દીયતમ્ ॥ ૫.૦૭૪.૦૯
અશ્વિના યદ્ધ કર્હિ ચિચ્છુશ્રૂયાતમિમં હવમ્ ।
વસ્વીરૂ ષુ વાં ભુજઃ પૃઞ્ચન્તિ સુ વાં પૃચઃ ॥ ૫.૦૭૪.૧૦

પ્રતિ પ્રિયતમં રથં વૃષણં વસુવાહનમ્ ।
સ્તોતા વામશ્વિનાવૃષિઃ સ્તોમેન પ્રતિ ભૂષતિ માધ્વી મમ શ્રુતં હવમ્ ॥ ૫.૦૭૫.૦૧
અત્યાયાતમશ્વિના તિરો વિશ્વા અહં સના ।
દસ્રા હિરણ્યવર્તની સુષુમ્ના સિન્ધુવાહસા માધ્વી મમ શ્રુતં હવમ્ ॥ ૫.૦૭૫.૦૨
આ નો રત્નાનિ બિભ્રતાવશ્વિના ગચ્છતં યુવમ્ ।

રુદ્રા હિરણ્યવર્તની જુષાણા વાજિનીવસૂ માધ્વી મમ શ્રુતં હવમ્ ॥ ૫.૦૭૫.૦૩
સુષ્ટુભો વાં વૃષણ્વસૂ રથે વાણીચ્યાહિતા ।
ઉત વાં કકુહો મૃગઃ પૃક્ષઃ કૃણોતિ વાપુષો માધ્વી મમ શ્રુતં હવમ્ ॥ ૫.૦૭૫.૦૪
બોધિન્મનસા રથ્યેષિરા હવનશ્રુતા ।
વિભિશ્ચ્યવાનમશ્વિના નિ યાથો અદ્વયાવિનં માધ્વી મમ શ્રુતં હવમ્ ॥ ૫.૦૭૫.૦૫
આ વાં નરા મનોયુજોઽશ્વાસઃ પ્રુષિતપ્સવઃ ।
વયો વહન્તુ પીતયે સહ સુમ્નેભિરશ્વિના માધ્વી મમ શ્રુતં હવમ્ ॥ ૫.૦૭૫.૦૬
અશ્વિનાવેહ ગચ્છતં નાસત્યા મા વિ વેનતમ્ ।
તિરશ્ચિદર્યયા પરિ વર્તિર્યાતમદાભ્યા માધ્વી મમ શ્રુતં હવમ્ ॥ ૫.૦૭૫.૦૭
અસ્મિન્યજ્ઞે અદાભ્યા જરિતારં શુભસ્પતી ।
અવસ્યુમશ્વિના યુવં ગૃણન્તમુપ ભૂષથો માધ્વી મમ શ્રુતં હવમ્ ॥ ૫.૦૭૫.૦૮
અભૂદુષા રુશત્પશુરાગ્નિરધાય્યૃત્વિયઃ ।
અયોજિ વાં વૃષણ્વસૂ રથો દસ્રાવમર્ત્યો માધ્વી મમ શ્રુતં હવમ્ ॥ ૫.૦૭૫.૦૯

આ ભાત્યગ્નિરુષસામનીકમુદ્વિપ્રાણાં દેવયા વાચો અસ્થુઃ ।
અર્વાઞ્ચા નૂનં રથ્યેહ યાતં પીપિવાંસમશ્વિના ઘર્મમચ્છ ॥ ૫.૦૭૬.૦૧
ન સંસ્કૃતં પ્ર મિમીતો ગમિષ્ઠાન્તિ નૂનમશ્વિનોપસ્તુતેહ ।
દિવાભિપિત્વેઽવસાગમિષ્ઠા પ્રત્યવર્તિં દાશુષે શમ્ભવિષ્ઠા ॥ ૫.૦૭૬.૦૨
ઉતા યાતં સંગવે પ્રાતરહ્નો મધ્યંદિન ઉદિતા સૂર્યસ્ય ।
દિવા નક્તમવસા શંતમેન નેદાનીં પીતિરશ્વિના તતાન ॥ ૫.૦૭૬.૦૩
ઇદં હિ વાં પ્રદિવિ સ્થાનમોક ઇમે ગૃહા અશ્વિનેદં દુરોણમ્ ।
આ નો દિવો બૃહતઃ પર્વતાદાદ્ભ્યો યાતમિષમૂર્જં વહન્તા ॥ ૫.૦૭૬.૦૪
સમશ્વિનોરવસા નૂતનેન મયોભુવા સુપ્રણીતી ગમેમ ।
આ નો રયિં વહતમોત વીરાના વિશ્વાન્યમૃતા સૌભગાનિ ॥ ૫.૦૭૬.૦૫

પ્રાતર્યાવાણા પ્રથમા યજધ્વં પુરા ગૃધ્રાદરરુષઃ પિબાતઃ ।
પ્રાતર્હિ યજ્ઞમશ્વિના દધાતે પ્ર શંસન્તિ કવયઃ પૂર્વભાજઃ ॥ ૫.૦૭૭.૦૧
પ્રાતર્યજધ્વમશ્વિના હિનોત ન સાયમસ્તિ દેવયા અજુષ્ટમ્ ।
ઉતાન્યો અસ્મદ્યજતે વિ ચાવઃ પૂર્વઃપૂર્વો યજમાનો વનીયાન્ ॥ ૫.૦૭૭.૦૨

હિરણ્યત્વઙ્મધુવર્ણો ઘૃતસ્નુઃ પૃક્ષો વહન્ના રથો વર્તતે વામ્ ।
મનોજવા અશ્વિના વાતરંહા યેનાતિયાથો દુરિતાનિ વિશ્વા ॥ ૫.૦૭૭.૦૩
યો ભૂયિષ્ઠં નાસત્યાભ્યાં વિવેષ ચનિષ્ઠં પિત્વો રરતે વિભાગે ।
સ તોકમસ્ય પીપરચ્છમીભિરનૂર્ધ્વભાસઃ સદમિત્તુતુર્યાત્ ॥ ૫.૦૭૭.૦૪
સમશ્વિનોરવસા નૂતનેન મયોભુવા સુપ્રણીતી ગમેમ ।
આ નો રયિં વહતમોત વીરાના વિશ્વાન્યમૃતા સૌભગાનિ ॥ ૫.૦૭૭.૦૫

અશ્વિનાવેહ ગચ્છતં નાસત્યા મા વિ વેનતમ્ ।
હંસાવિવ પતતમા સુતાઁ ઉપ ॥ ૫.૦૭૮.૦૧
અશ્વિના હરિણાવિવ ગૌરાવિવાનુ યવસમ્ ।
હંસાવિવ પતતમા સુતાઁ ઉપ ॥ ૫.૦૭૮.૦૨
અશ્વિના વાજિનીવસૂ જુષેથાં યજ્ઞમિષ્ટયે ।
હંસાવિવ પતતમા સુતાઁ ઉપ ॥ ૫.૦૭૮.૦૩
અત્રિર્યદ્વામવરોહન્નૃબીસમજોહવીન્નાધમાનેવ યોષા ।
શ્યેનસ્ય ચિજ્જવસા નૂતનેનાગચ્છતમશ્વિના શંતમેન ॥ ૫.૦૭૮.૦૪
વિ જિહીષ્વ વનસ્પતે યોનિઃ સૂષ્યન્ત્યા ઇવ ।
શ્રુતં મે અશ્વિના હવં સપ્તવધ્રિં ચ મુઞ્ચતમ્ ॥ ૫.૦૭૮.૦૫
ભીતાય નાધમાનાય ઋષયે સપ્તવધ્રયે ।
માયાભિરશ્વિના યુવં વૃક્ષં સં ચ વિ ચાચથઃ ॥ ૫.૦૭૮.૦૬
યથા વાતઃ પુષ્કરિણીં સમિઙ્ગયતિ સર્વતઃ ।
એવા તે ગર્ભ એજતુ નિરૈતુ દશમાસ્યઃ ॥ ૫.૦૭૮.૦૭
યથા વાતો યથા વનં યથા સમુદ્ર એજતિ ।
એવા ત્વં દશમાસ્ય સહાવેહિ જરાયુણા ॥ ૫.૦૭૮.૦૮
દશ માસાઞ્છશયાનઃ કુમારો અધિ માતરિ ।
નિરૈતુ જીવો અક્ષતો જીવો જીવન્ત્યા અધિ ॥ ૫.૦૭૮.૦૯

મહે નો અદ્ય બોધયોષો રાયે દિવિત્મતી ।
યથા ચિન્નો અબોધયઃ સત્યશ્રવસિ વાય્યે સુજાતે અશ્વસૂનૃતે ॥ ૫.૦૭૯.૦૧
યા સુનીથે શૌચદ્રથે વ્યૌચ્છો દુહિતર્દિવઃ ।

સા વ્યુચ્છ સહીયસિ સત્યશ્રવસિ વાય્યે સુજાતે અશ્વસૂનૃતે ॥ ૫.૦૭૯.૦૨
સા નો અદ્યાભરદ્વસુર્વ્યુચ્છા દુહિતર્દિવઃ ।
યો વ્યૌચ્છઃ સહીયસિ સત્યશ્રવસિ વાય્યે સુજાતે અશ્વસૂનૃતે ॥ ૫.૦૭૯.૦૩
અભિ યે ત્વા વિભાવરિ સ્તોમૈર્ગૃણન્તિ વહ્નયઃ ।
મઘૈર્મઘોનિ સુશ્રિયો દામન્વન્તઃ સુરાતયઃ સુજાતે અશ્વસૂનૃતે ॥ ૫.૦૭૯.૦૪
યચ્ચિદ્ધિ તે ગણા ઇમે છદયન્તિ મઘત્તયે ।
પરિ ચિદ્વષ્ટયો દધુર્દદતો રાધો અહ્રયં સુજાતે અશ્વસૂનૃતે ॥ ૫.૦૭૯.૦૫
ઐષુ ધા વીરવદ્યશ ઉષો મઘોનિ સૂરિષુ ।
યે નો રાધાંસ્યહ્રયા મઘવાનો અરાસત સુજાતે અશ્વસૂનૃતે ॥ ૫.૦૭૯.૦૬
તેભ્યો દ્યુમ્નં બૃહદ્યશ ઉષો મઘોન્યા વહ ।
યે નો રાધાંસ્યશ્વ્યા ગવ્યા ભજન્ત સૂરયઃ સુજાતે અશ્વસૂનૃતે ॥ ૫.૦૭૯.૦૭
ઉત નો ગોમતીરિષ આ વહા દુહિતર્દિવઃ ।
સાકં સૂર્યસ્ય રશ્મિભિઃ શુક્રૈઃ શોચદ્ભિરર્ચિભિઃ સુજાતે અશ્વસૂનૃતે ॥ ૫.૦૭૯.૦૮
વ્યુચ્છા દુહિતર્દિવો મા ચિરં તનુથા અપઃ ।
નેત્ત્વા સ્તેનં યથા રિપું તપાતિ સૂરો અર્ચિષા સુજાતે અશ્વસૂનૃતે ॥ ૫.૦૭૯.૦૯
એતાવદ્વેદુષસ્ત્વં ભૂયો વા દાતુમર્હસિ ।
યા સ્તોતૃભ્યો વિભાવર્યુચ્છન્તી ન પ્રમીયસે સુજાતે અશ્વસૂનૃતે ॥ ૫.૦૭૯.૧૦

દ્યુતદ્યામાનં બૃહતીમૃતેન ઋતાવરીમરુણપ્સું વિભાતીમ્ ।
દેવીમુષસં સ્વરાવહન્તીં પ્રતિ વિપ્રાસો મતિભિર્જરન્તે ॥ ૫.૦૮૦.૦૧
એષા જનં દર્શતા બોધયન્તી સુગાન્પથઃ કૃણ્વતી યાત્યગ્રે ।
બૃહદ્રથા બૃહતી વિશ્વમિન્વોષા જ્યોતિર્યચ્છત્યગ્રે અહ્નામ્ ॥ ૫.૦૮૦.૦૨
એષા ગોભિરરુણેભિર્યુજાનાસ્રેધન્તી રયિમપ્રાયુ ચક્રે ।
પથો રદન્તી સુવિતાય દેવી પુરુષ્ટુતા વિશ્વવારા વિ ભાતિ ॥ ૫.૦૮૦.૦૩
એષા વ્યેની ભવતિ દ્વિબર્હા આવિષ્કૃણ્વાના તન્વં પુરસ્તાત્ ।
ઋતસ્ય પન્થામન્વેતિ સાધુ પ્રજાનતીવ ન દિશો મિનાતિ ॥ ૫.૦૮૦.૦૪
એષા શુભ્રા ન તન્વો વિદાનોર્ધ્વેવ સ્નાતી દૃશયે નો અસ્થાત્ ।
અપ દ્વેષો બાધમાના તમાંસ્યુષા દિવો દુહિતા જ્યોતિષાગાત્ ॥ ૫.૦૮૦.૦૫

એષા પ્રતીચી દુહિતા દિવો નૄન્યોષેવ ભદ્રા નિ રિણીતે અપ્સઃ ।
વ્યૂર્ણ્વતી દાશુષે વાર્યાણિ પુનર્જ્યોતિર્યુવતિઃ પૂર્વથાકઃ ॥ ૫.૦૮૦.૦૬
યુઞ્જતે મન ઉત યુઞ્જતે ધિયો વિપ્રા વિપ્રસ્ય બૃહતો વિપશ્ચિતઃ ।
વિ હોત્રા દધે વયુનાવિદેક ઇન્મહી દેવસ્ય સવિતુઃ પરિષ્ટુતિઃ ॥ ૫.૦૮૧.૦૧
વિશ્વા રૂપાણિ પ્રતિ મુઞ્ચતે કવિઃ પ્રાસાવીદ્ભદ્રં દ્વિપદે ચતુષ્પદે ।
વિ નાકમખ્યત્સવિતા વરેણ્યોઽનુ પ્રયાણમુષસો વિ રાજતિ ॥ ૫.૦૮૧.૦૨
યસ્ય પ્રયાણમન્વન્ય ઇદ્યયુર્દેવા દેવસ્ય મહિમાનમોજસા ।
યઃ પાર્થિવાનિ વિમમે સ એતશો રજાંસિ દેવઃ સવિતા મહિત્વના ॥ ૫.૦૮૧.૦૩
ઉત યાસિ સવિતસ્ત્રીણિ રોચનોત સૂર્યસ્ય રશ્મિભિઃ સમુચ્યસિ ।
ઉત રાત્રીમુભયતઃ પરીયસ ઉત મિત્રો ભવસિ દેવ ધર્મભિઃ ॥ ૫.૦૮૧.૦૪
ઉતેશિષે પ્રસવસ્ય ત્વમેક ઇદુત પૂષા ભવસિ દેવ યામભિઃ ।
ઉતેદં વિશ્વં ભુવનં વિ રાજસિ શ્યાવાશ્વસ્તે સવિતઃ સ્તોમમાનશે ॥ ૫.૦૮૧.૦૫
તત્સવિતુર્વૃણીમહે વયં દેવસ્ય ભોજનમ્ ।
શ્રેષ્ઠં સર્વધાતમં તુરં ભગસ્ય ધીમહિ ॥ ૫.૦૮૨.૦૧
અસ્ય હિ સ્વયશસ્તરં સવિતુઃ કચ્ચન પ્રિયમ્ ।
ન મિનન્તિ સ્વરાજ્યમ્ ॥ ૫.૦૮૨.૦૨
સ હિ રત્નાનિ દાશુષે સુવાતિ સવિતા ભગઃ ।
તં ભાગં ચિત્રમીમહે ॥ ૫.૦૮૨.૦૩
અદ્યા નો દેવ સવિતઃ પ્રજાવત્સાવીઃ સૌભગમ્ ।
પરા દુષ્ષ્વપ્ન્યં સુવ ॥ ૫.૦૮૨.૦૪
વિશ્વાનિ દેવ સવિતર્દુરિતાનિ પરા સુવ ।
યદ્ભદ્રં તન્ન આ સુવ ॥ ૫.૦૮૨.૦૫
અનાગસો અદિતયે દેવસ્ય સવિતુઃ સવે ।
વિશ્વા વામાનિ ધીમહિ ॥ ૫.૦૮૨.૦૬
આ વિશ્વદેવં સત્પતિં સૂક્તૈરદ્યા વૃણીમહે ।
સત્યસવં સવિતારમ્ ॥ ૫.૦૮૨.૦૭
ય ઇમે ઉભે અહની પુર એત્યપ્રયુચ્છન્ ।

સ્વાધીર્દેવઃ સવિતા ॥ ૫.૦૮૨.૦૮

ય ઇમા વિશ્વા જાતાન્યાશ્રાવયતિ શ્લોકેન ।
પ્ર ચ સુવાતિ સવિતા ॥ ૫.૦૮૨.૦૯

અચ્છા વદ તવસં ગીર્ભિરાભિઃ સ્તુહિ પર્જન્યં નમસા વિવાસ ।
કનિક્રદદ્વૃષભો જીરદાનૂ રેતો દધાત્યોષધીષુ ગર્ભમ્ ॥ ૫.૦૮૩.૦૧

વિ વૃક્ષાન્હન્ત્યુત હન્તિ રક્ષસો વિશ્વં બિભાય ભુવનં મહાવધાત્ ।
ઉતાનાગા ઈષતે વૃષ્ણ્યાવતો યત્પર્જન્યઃ સ્તનયન્હન્તિ દુષ્કૃતઃ ॥ ૫.૦૮૩.૦૨

રથીવ કશયાશ્વાઁ અભિક્ષિપન્નાવિર્દૂતાન્કૃણુતે વર્ષ્યાઁ૩ અહ ।
દૂરાત્સિંહસ્ય સ્તનથા ઉદીરતે યત્પર્જન્યઃ કૃણુતે વર્ષ્યં૧ નભઃ ॥ ૫.૦૮૩.૦૩

પ્ર વાતા વાન્તિ પતયન્તિ વિદ્યુત ઉદોષધીર્જિહતે પિન્વતે સ્વઃ ।
ઇરા વિશ્વસ્મૈ ભુવનાય જાયતે યત્પર્જન્યઃ પૃથિવીં રેતસાવતિ ॥ ૫.૦૮૩.૦૪

યસ્ય વ્રતે પૃથિવી નન્નમીતિ યસ્ય વ્રતે શફવજ્જર્ભુરીતિ ।
યસ્ય વ્રત ઓષધીર્વિશ્વરૂપાઃ સ નઃ પર્જન્ય મહિ શર્મ યચ્છ ॥ ૫.૦૮૩.૦૫

દિવો નો વૃષ્ટિં મરુતો રરીધ્વં પ્ર પિન્વત વૃષ્ણો અશ્વસ્ય ધારાઃ ।
અર્વાઙેતેન સ્તનયિત્નુનેહ્યપો નિષિઞ્ચન્નસુરઃ પિતા નઃ ॥ ૫.૦૮૩.૦૬

અભિ ક્રન્દ સ્તનય ગર્ભમા ધા ઉદન્વતા પરિ દીયા રથેન ।
દૃતિં સુ કર્ષ વિષિતં ન્યઞ્ચં સમા ભવન્તૂદ્વતો નિપાદાઃ ॥ ૫.૦૮૩.૦૭

મહાન્તં કોશમુદચા નિ ષિઞ્ચ સ્યન્દન્તાં કુલ્યા વિષિતાઃ પુરસ્તાત્ ।
ઘૃતેન દ્યાવાપૃથિવી વ્યુન્ધિ સુપ્રપાણં ભવત્વઘ્ન્યાભ્યઃ ॥ ૫.૦૮૩.૦૮

યત્પર્જન્ય કનિક્રદત્સ્તનયન્હંસિ દુષ્કૃતઃ ।
પ્રતીદં વિશ્વં મોદતે યત્કિં ચ પૃથિવ્યામધિ ॥ ૫.૦૮૩.૦૯

અવર્ષીર્વર્ષમુદુ ષૂ ગૃભાયાકર્ધન્વાન્યત્યેતવા ઉ ।
અજીજન ઓષધીર્ભોજનાય કમુત પ્રજાભ્યોऽવિદો મનીષામ્ ॥ ૫.૦૮૩.૧૦

બળિત્થા પર્વતાનાં ખિદ્રં બિભર્ષિ પૃથિવિ ।
પ્ર યા ભૂમિં પ્રવત્વતિ મહ્ના જિનોષિ મહિનિ ॥ ૫.૦૮૪.૦૧

સ્તોમાસસ્ત્વા વિચારિણિ પ્રતિ ષ્ટોભન્ત્યક્તુભિઃ ।
પ્ર યા વાજં ન હેષન્તં પેરુમસ્યસ્યર્જુનિ ॥ ૫.૦૮૪.૦૨

દૃળ્હા ચિદ્યા વનસ્પતીન્ક્ષ્મયા દર્ધર્ષ્યોજસા ।
યત્તે અભ્રસ્ય વિદ્યુતો દિવો વર્ષન્તિ વૃષ્ટયઃ ॥ ૫.૦૮૪.૦૩

પ્ર સમ્રાજે બૃહદર્ચા ગભીરં બ્રહ્મ પ્રિયં વરુણાય શ્રુતાય ।
વિ યો જઘાન શમિતેવ ચર્મોપસ્તિરે પૃથિવીં સૂર્યાય ॥ ૫.૦૮૫.૦૧
વનેષુ વ્યન્તરિક્ષં તતાન વાજમર્વત્સુ પય ઉસ્રિયાસુ ।
હૃત્સુ ક્રતું વરુણો અપ્સ્વગ્નિં દિવિ સૂર્યમદધાત્સોમમદ્રૌ ॥ ૫.૦૮૫.૦૨
નીચીનબારં વરુણઃ કવન્ધં પ્ર સસર્જ રોદસી અન્તરિક્ષમ્ ।
તેન વિશ્વસ્ય ભુવનસ્ય રાજા યવં ન વૃષ્ટિર્વ્યુનત્તિ ભૂમ ॥ ૫.૦૮૫.૦૩
ઉનત્તિ ભૂમિં પૃથિવીમુત દ્યાં યદા દુગ્ધં વરુણો વષ્ટ્યાદિત્ ।
સમભ્રેણ વસત પર્વતાસસ્તવિષીયન્તઃ શ્રથયન્ત વીરાઃ ॥ ૫.૦૮૫.૦૪
ઇમામૂ ષ્વાસુરસ્ય શ્રુતસ્ય મહીં માયાં વરુણસ્ય પ્ર વોચમ્ ।
માનેનેવ તસ્થિવાઁ અન્તરિક્ષે વિ યો મમે પૃથિવીં સૂર્યેણ ॥ ૫.૦૮૫.૦૫
ઇમામૂ નુ કવિતમસ્ય માયાં મહીં દેવસ્ય નકિરા દધર્ષ ।
એકં યદુદ્ના ન પૃણન્ત્યેનીરાસિઞ્ચન્તીરવનયઃ સમુદ્રમ્ ॥ ૫.૦૮૫.૦૬
અર્યમ્યં વરુણ મિત્ર્યં વા સખાયં વા સદમિદ્ભ્રાતરં વા ।
વેશં વા નિત્યં વરુણારણં વા યત્સીમાગશ્ચકૃમા શિશ્રથસ્તત્ ॥ ૫.૦૮૫.૦૭
કિતવાસો યદ્રિરિપુર્ન દીવિ યદ્વા ઘા સત્યમુત યન્ન વિદ્મ ।
સર્વા તા વિ ષ્ય શિથિરેવ દેવાધા તે સ્યામ વરુણ પ્રિયાસઃ ॥ ૫.૦૮૫.૦૮

ઇન્દ્રાગ્ની યમવથ ઉભા વાજેષુ મર્ત્યમ્ ।
દૃળ્હા ચિત્સ પ્ર ભેદતિ દ્યુમ્ના વાણીરિવ ત્રિતઃ ॥ ૫.૦૮૬.૦૧
યા પૃતનાસુ દુષ્ટરા યા વાજેષુ શ્રવાય્યા ।
યા પઞ્ચ ચર્ષણીરભીન્દ્રાગ્ની તા હવામહે ॥ ૫.૦૮૬.૦૨
તયોરિદમવચ્છવસ્તિગ્મા દિદ્યુન્મઘોનોઃ ।
પ્રતિ દ્રુણા ગભસ્ત્યોર્ગવાં વૃત્રઘ્ન એષતે ॥ ૫.૦૮૬.૦૩
તા વામેષે રથાનામિન્દ્રાગ્ની હવામહે ।
પતી તુરસ્ય રાધસો વિદ્વાંસા ગિર્વણસ્તમા ॥ ૫.૦૮૬.૦૪
તા વૃધન્તાવનુ દ્યૂન્મર્તાય દેવાવદભા ।

અર્હન્તા ચિત્પુરો દધેંઽશેવ દેવાવર્વતે ॥ ૫.૦૮૬.૦૫

એવેન્દ્રાગ્નિભ્યામહાવિ હવ્યં શૂષ્યં ઘૃતં ન પૂતમદ્રિભિઃ ।

તા સૂરિષુ શ્રવો બૃહદ્રયિં ગૃણત્સુ દિધૃતમિષં ગૃણત્સુ દિધૃતમ્ ॥ ૫.૦૮૬.૦૬

પ્ર વો મહે મતયો યન્તુ વિષ્ણવે મરુત્વતે ગિરિજા એવયામરુત્ ।

પ્ર શર્ધાય પ્રયજ્યવે સુખાદયે તવસે ભન્દદિષ્ટયે ધુનિવ્રતાય શવસે ॥ ૫.૦૮૭.૦૧

પ્ર યે જાતા મહિના યે ચ નુ સ્વયં પ્ર વિદ્મના બ્રુવત એવયામરુત્ ।

ક્રત્વા તદ્વો મરુતો નાધૃષે શવો દાના મહ્ના તદેષામધૃષ્ટાસો નાદ્રયઃ ॥ ૫.૦૮૭.૦૨

પ્ર યે દિવો બૃહતઃ શૃણ્વિરે ગિરા સુશુક્વાનઃ સુભ્વ એવયામરુત્ ।

ન યેષામિરી સધસ્થ ઈષ્ટ આઁ અગ્નયો ન સ્વવિદ્યુતઃ પ્ર સ્યન્દ્રાસો ધુનીનામ્ ॥ ૫.૦૮૭.૦૩

સ ચક્રમે મહતો નિરુરુક્રમઃ સમાનસ્માત્સદસ એવયામરુત્ ।

યદાયુક્ત ત્મના સ્વાદધિ ષ્ણુભિર્વિષ્પર્ધસો વિમહસો જિગાતિ શેવૃધો નૃભિઃ ॥ ૫.૦૮૭.૦૪

સ્વનો ન વોઽમવાન્રેજયદ્વૃષા ત્વેષો યયિસ્તવિષ એવયામરુત્ ।

યેના સહન્ત ઋઞ્જત સ્વરોચિષઃ સ્થારશ્માનો હિરણ્યયાઃ સ્વાયુધાસ ઇષ્મિણઃ ॥ ૫.૦૮૭.૦૫

અપારો વો મહિમા વૃદ્ધશવસસ્ત્વેષં શવોઽવત્વેવયામરુત્ ।

સ્થાતારો હિ પ્રસિતૌ સંદૃશિ સ્થન તે ન ઉરુષ્યતા નિદઃ શુશુક્વાંસો નાગ્નયઃ ॥ ૫.૦૮૭.૦૬

તે રુદ્રાસઃ સુમખા અગ્નયો યથા તુવિદ્યુમ્ના અવન્ત્વેવયામરુત્ ।

દીર્ઘં પૃથુ પપ્રથે સદ્મ પાર્થિવં યેષામજ્મેષ્વા મહઃ શર્ધાંસ્યદ્ભુતૈનસામ્ ॥ ૫.૦૮૭.૦૭

અદ્વેષો નો મરુતો ગાતુમેતન શ્રોતા હવં જરિતુરેવયામરુત્ ।

વિષ્ણોર્મહઃ સમન્યવો યુયોતન સ્મદ્રથ્યો ન દંસનાપ દ્વેષાંસિ સનુતઃ ॥ ૫.૦૮૭.૦૮

ગન્તા નો યજ્ઞં યજ્ઞિયાઃ સુશમિ શ્રોતા હવમરક્ષ એવયામરુત્ ।

જ્યેષ્ઠાસો ન પર્વતાસો વ્યોમનિ યૂયં તસ્ય પ્રચેતસઃ સ્યાત દુર્ધર્તવો નિદઃ ॥ ૫.૦૮૭.૦૯

Last updated July 2, 2013

Special mention : Initial processing and help by Avinash and Shashi Sathaye,
Avinash Chopde, Shree Devi Kumar, Sunder Hattangadi, John Gardner.
Reprocessed from Original in final form by Detlef Eichler with additional corrections.
See Detlef's site http://www.detlef108.de/Rigvedatm
for other details and formats.

The text is shown with accents (Anudattas, dependent Svaritas,
and independent Svaritas including Kampas). Words are connected (agnimILe).
Ch is doubled as in gachChati according to the rules of Rigveda-Pratishakhya.
At the end of a word m is replaced by Anusvara M if the initial letter of the
following word is a labial stop consonant (p, ph, b, bh, m).
Visarga H before sh, Sh or s followed by a voiceless consonant has been restored.

Source : The Aufrecht/van Nooten/Holland (Samhita) version
of the Rigveda (http://www.people.fasarvard.edu/ witzel/onlineRVtm).
In this text accented vowels have Udatta or 'independent Svarita' markers.
Kampas are not shown. Words are separated (agnim ILe).
Ch is not doubled as in gaChati. At the end of a word we find m before
a following labial stop consonant (p, ph, b, bh, m).
Visarga H before sh, Sh or s followed by a voiceless consonant has
been dropped according to a rule of Rigveda-Pratishakhya.

Send corrections to : detlefeichler@googlemail.com, sanskrit@cheerful.com

*Rigveda Mandala 5*

pdf was typeset on October 2, 2020

Please send corrections to *sanskrit@cheerful.com*